CC-0. In Public Domain. Digitization by eGangotri

॥०॥ श्रीमङ्गलमूर्त्तये नमः ॥०॥

॥*॥ श्रीमद्बालबोधरामायणम् ॥*॥

रचयिता–

नेपालराज्यस्थ सप्तरी जिलान्तर्गत खकरपुरा ग्रामनिवासी
झोपाह्वो ज्यौ० श्री दामोदर शर्म्मा

प्रथमावृत्तौ

मूल्यप्रचारार्थ–दूरुपया मात्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं० ४६४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"एको विचारबिन्दुः"

नं०४६४७

यथाकालं यथाशक्ति यथासाध्य मलूलुकम् अयोध्याकाण्डपर्यन्त मेतद्रामायणं महत् ।
शब्द शास्त्र मनाधीत्य परांव्युत्पत्तिमादधत् रामायणमदो येन निर्ममे, साहसन्तु तत् ॥
श्लाघनीयं विशेषज्ञैः साहित्याम्बुधिपारगैः । गच्छतः स्खलनन्यायाद्दोषदृष्टिर्न दीयताम् ॥
दामोदरः कविवरो गणकाधिराजो भक्तिप्रवाहपतितो निरमा दिदं यत् ।
ग्रन्थे तदत्र सुधिया नहि दोषदृष्टि त्रुष्टिर्विधातुमुचितेति निवेदयामि ॥
भक्तिरसामृतपूर्णं चूर्णं भवबन्धरोगराजस्य अच्छिद्रदर्शि सहृदय भक्तै रामायणन्त्विदं सेव्यम् ॥

प० श्रीत्रिलोकनाथ मिश्रः

दरभङ्गा राज संस्कृतमहाविद्यालयाध्यक्षः

तथाच

दरभङ्गा राजकीय प्रधान पण्डित

श्रीबलदेव मिश्रस्यात्रग्रन्थे यथास्थानावलोकन पुरः सरं सम्मतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्री ससीत रामलक्ष्मणाभ्यान्नमः ॥

नं०४६४७

॥ अथ बालकाण्डम् ॥

श्री विष्णु र्मनुजावतार मदधत् सम्प्रार्थनातोविधे-
र्लोकानां सुखहेतवे च वसुधा भारापहाराय च ॥
नाम्ना सम्प्रथितः स राम इतितत्पादद्वयं प्रेमतो
ध्यात्वा चेतसि तस्य बालचरितात्सारं प्रवक्ष्याम्यहम् ॥१॥
नाधीतञ्च मयाऽर्थबोधजनकं शास्त्रं सुशब्दं किमु
ज्यौतिःशास्त्र मपारमस्ति जतनधैस्तुल्यंहि तस्मात्कियत् ॥
प्राप्तीतञ्च कृपानिधेर्भगवतो रामस्य संसेवना-
द्वक्ष्येऽहं रघुनायकस्य विमलंचित्रं चरित्रं स्फुटम् ॥२॥
दृष्ट्वेदं विबुधैस्त्रुटिर्मम कृतौ संयोज्यतामत्र या
ज्ञात्वा सर्व मयस्य चाखिलपतेः सौम्यंचरित्रं त्विदम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाठाद्वा श्रवणाच्च वेह परमं सौख्यं परे मोक्षकं
तस्माद्ग्राह्य मिदं पवित्र ममलं सर्वैः सदासादरम् ॥३॥

रामायणानि भुविसन्ति वहूनि यानि नानापुराण निगमागम सम्मतानि
रामस्यचित्रचरितानि सुनिर्मलानि ब्रह्मर्षिभिर्विमल मानसवीक्षितानि ॥
सर्वाणितानिविपुलानि सुदुर्गमानि विद्वज्जनेतर जनस्य न रञ्जकानि
सर्वस्य वोधजनकानि मयाकृतानि काण्डानिसप्तसरलानि लघूत्तमानि ॥४॥

भूमिर्यदा भारत एव नम्रा निशाचरेशस्य दशाननादेः ॥
विधृत्य गोरूप मवाप पाद्मजंपदं सदेवा व्यसनान्युवाच ॥५॥

ब्रह्माऽथदेवैःसह गोस्वरूपया भूम्या च सार्द्धं प्रययौ पयोनिधम् ॥
धाताऽवदद्वाक्य मतीवभक्त्या श्रियःपतिं क्षीरनिधौप्रसुप्तम् ॥६॥

प्रभो ! प्रसादान्मम रावणोऽसुरो ददातिदुःखं मुनिगोद्विजेभ्यः ॥
विजित्य सर्वान् सुरकिन्नरोरगान् चकार तेषां पदमासनं स्वकम् ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनुष्यतस्तस्य वधः प्रदिष्टस्ततः समासाद्य मनुष्यरूपम् ॥
निहत्य लोकत्रयकण्टकासुरं त्रायस्व लोकत्रितयं स्वबाहुभिः ॥८॥
निशम्य वाचोऽथ किलाब्जयोने रुदीरितं सद्वचनंततो रुषा ॥
हराम्यहं भारमशेषभूमेरुत्पद्य सत्कोसलराजधान्याम् ॥९॥
मदंशतस्तत्र सहोदरास्त्रयो नूनं भविष्यन्ति निशम्यतां विधे ! ॥
लक्ष्मीर्विदेहस्य पुरे सुभूमितश्चोत्पद्य तस्यैव गृहे वसिष्यति ॥१०॥
निशम्य धाता त्रिदशानुवाच भूमिं समाश्वास्य विविच्य तत्र ॥
हरिर्भवेद्भानुकुले शृणुध्वं देवाश्च सर्वे प्रभवन्तु वानराः ॥११॥
देवास्ततो वानररूपतांगताः सहाय्यहेतोः परमेश्वरस्य ॥
श्रुत्वा विधेर्वाक्य मितस्ततस्ते भ्रमन्ति भूमौ गिरिकाननादिषु ॥१२॥
अवधनगरभूपो भूपतीनामपीशो
दशरथ इति संज्ञो योऽभवत्सूर्यवंशे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विविधसुखसमेतः किन्तु नास्त्यस्यपुत्र-
स्तनयजनक यज्ञं वृद्धकालेऽकरोत्सः ॥१३॥
प्रत्यक्षतामेत्यहुताशनस्तदा ददौचरुं भूपतये सहर्षम् ॥
भूपोहितं कोशलराजकन्याकां कैकेयिनाम्नीं प्रददौ सुतेच्छया ॥१४॥
समागता तत्र सतीसुमित्रा विलोक्यतां स्वस्वविभागयोः पुनः ॥
कृत्वाऽर्द्धमर्द्धं प्रददौ प्रहर्षात् तिस्रोऽतिप्रेम्णा वुभुजुश्चरून्तम् ॥१५॥
तेनैवप्रदधुश्च तायुवतयो गर्भाणि भूपप्रिया
भूपस्तत्र चकार शास्त्रविधिना कार्याणियत्तन्मुदा ॥
नार्योपिप्रविरेजिरेहि भवने भूपेनवै सर्वदा
श्रुत्वैतत् प्रमुदान्विताश्च नगरे लोकावभूवुर्भृशम् ॥१६॥
अथेश्वरः प्राप्य पुरीमयोध्यां रघोःकुले चैत्रसिते नवम्याम् ॥
वभूव पूर्णेन्दु सहस्रतोधिकां मुखश्रियं वीक्ष्य जगाद माता ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेनाथ ? सर्वंभुवनं तवोदरे चास्तीति सर्वैविबुधावदन्ति ॥
परं त्वदीयंजननं ममोदराच्छ्रुत्वा वदिष्यन्ति जनाः किमद्भुतम् ॥१८॥
अतः समाहृत्य सुरूपमद्भुतं प्रदर्श्यतां मानुषबालकाकृतिः ॥
हेनाथ ? तद्बालककञ्जवन्मुखं विलोक्य कालंकठिनं तराम्यहम् ॥१९॥

इतीश्रीमद्बालबोधरामायणे वालकाण्डे प्रथमः सर्गः ॥१॥

श्रुत्वा स्वमातुर्वचनं स सद्यो हरिर्बभूवातिसुशोभनः शिशुः ॥
तत्रापिरूपं विमलंविलोक्य सा प्रमोदयुक्ता कृतकृत्यतांगता ॥१॥
अथान्यभार्याद्वयतः सुतत्रयं बभूव संश्रुत्य नृपः प्रफुल्लितः ॥
मुनिं समाहूय सुनामकर्म प्रकारयामास कृतो कृतज्ञः ॥२॥
यस्मिन् रमन्ते मुनयः सदैव सएव रामोऽत्र जनैरुदीरितः ॥
तवात्मजोऽयं नृपते ? द्वितीयः सुलक्षणाल्लक्ष्मणसंज्ञकश्च ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भरन्तिलोकान् भरताह्वयोऽयं शत्रुघ्नसंज्ञोऽरिजनस्यहन्ता ॥
कौसल्ययाऽसावि सुखेन रामः कैकेयितोवै भरतोबभूव ॥४॥
सुमित्रया लक्ष्मणशत्रुसूदनौ रामस्य कैकेयिसुतस्य चानुगौ ॥
शुभावनेमैथिलभूप भूमेर्लक्ष्मीर्बभूवाथ नृपस्यगेहे ॥५॥
स्थिताच भूपेनसुपालिता सा वृद्धिंगता चान्द्रमसीकलेव ॥
अथोपनीतः सहबन्धुभिर्मुदा रामो वसिष्ठेन यथोक्तकाले ॥६॥
तथैव शस्त्राणि सुपाठितानि वेदेषु सर्वे निपुणाबभूवुः ॥
ततस्त्वयोध्या नगरे नृपस्यद्वारे समासाद्य सुकौशिकोमुनिः ॥७॥
नृपं ययाचे किल रामलक्ष्मणौ वधाय मारीच सुबाहु रक्षसोः ॥
नृपो वसिष्ठं परिपृच्छति प्रभो ? करोम्यहं किं वदसद्विचारम् ॥८॥
रामोव्रजेच्चेन्मरणं सुनिश्चितं मामन्यथा शप्स्यति गाधिसूनुः ॥
श्रुत्वा वचस्तन्नृपतेर्हि तत्र जगाद तथ्यंपरमं मुनीन्द्रः ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृणोतु रामो न मनुष्य ईश्वर स्तवालये लोकहितायजातः ॥
लक्ष्मोश्च जाता किल मैथिलालये तयोर्द्वयोर्योजयितुं स आगतः ॥१०॥
ततोनृपो राममजं सनातनं सलक्ष्मणं गाधिसुताय कृच्छ्रात् ॥
भियाऽर्पयित्वाऽश्रु समाकुलःसन् बद्धाञ्जलिर्वाक्य मुवाच दीनम् ॥११॥
सुताविमौप्राणसमौ मुने ! मे तत्रापि रामः शृणु प्राणतोऽधिकः ॥
अतस्त्वया यत्नपुरस्सरेण सुरक्षणीयौ मम बालकाविमौ ॥१२॥
श्रुत्वा वचस्तत् किल कोसलेशा दुवाच भूपस्यपुरः स कौशिकः ॥
न चिन्तनीयं नृप ! ते भवेच्छुभं करोम्यहं बालकयोः सुरक्षणम् ॥१३॥
कालंकियन्तं समतीत्य बालकौ श्रियायुतौ द्रक्ष्यसि कोसलेन्द्र ! ॥
नीत्वा कुमारावति मोदतो मुनिः सम्प्रस्थितः कोसलतः स्वमाश्रमम् ॥१४॥
दिव्यास्त्रजालान् सरहस्यमन्त्रान् ददौ मुनिर्वर्त्मनि राघवाभ्याम् ॥
मार्गेऽथतस्मिन् विपिनेऽतिघोरे निशाचरी या समुवास ताड़का ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वा मुनिं राघवलक्ष्मणाभ्यां दुद्राव सद्योऽतिरुषान्विता सा ॥
रामोद्धुतं तत्र मुनेरनुज्ञया जघान तस्याहृदि वाणमेकम् ॥१६॥
निपत्य भूमावतिघोरनादं कृत्वा गता सा सदनं यमस्य ॥
पुनः स तस्मात् किल कौशिकस्या श्रमंगतश्चाति मुदा सलक्ष्मणः ॥१७॥
परस्परं तत्र वनाधिवासिनो निशम्य सर्वे प्रययुर्मुदान्विताः ॥
दृष्ट्वाच तौ कामकलापसौभगौ ज्ञात्वेश्वरौ मानुषरूपधारिणौ ॥१८॥
नानोपचारैः किल कौशिकादिभिः कृतं तयोश्चातिमुदा प्रपूजनम् ॥
ततः स रामेण मुदा मुनीनांसंध्येप्रपृष्टः किल कौशिकाख्यः ॥१९॥
गतायुषौ यज्ञविनाशकारकौ प्रदर्शयत्वाशु सुवाहुमारिचौ ॥
रामात्समाश्रुत्य वनाधिवासिनः प्रारब्धयन्तः सुमखं यथावत् ॥२०॥
निशम्यतौ तत्र दिविस्पृशंस्वनं वेदस्य सद्योऽभिमुखं प्रधावतुः ॥
रामस्तयोस्तत्र विलोक्यचोद्यमं नीत्वाधनुः सायकयुग्ममादधे ॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुबाहुमेकेन निहत्य चैकतो मारीचमब्धौ समपातयद्दुषा ॥
तथा तयोश्चानुचरादिकानहन् शराभिघातैः समरे फणीश्वरः ॥२२॥
विलोक्य देवाः सुदिवोऽतिहर्षात् पुष्पाणि रामोपरि संववर्षुः ॥

इतीश्रीमद्बालबोध रामायणे बालकाण्डे द्वितीयः सर्गः ॥२॥

अथाह रामं किल कौशिकोमुनि र्विदेहराजस्यपुरे स्वयंवरः ॥१॥
भविष्यतीत्यद्य—मयासहत्वं व्रजातिशीघ्रं सहलक्ष्मणेन ॥
न्यस्तं पिनाकं किल मैथिलेन भञ्जेत्स सीतां प्रलभेत वीरः ॥२॥
अतो विदेहस्यपुरे प्रभाविनी भूपावलीभिर्वसुधा समाकुला ॥
ततोद्रुतं संव्रज राम ! तत्र सम्पूज्यसे राजसमाजपंक्तिभिः ॥३॥
पिनाकमालोक्य पिनाकिनस्ततः सुखेन सद्यः स्वगृहं व्रजिष्यसि ॥
ततः स रामो मुनिना समेतः सलक्ष्मणो मैथिलराजधान्याम् ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्प्रस्थितस्तत्र सुमार्गमध्ये विलोक्य सौम्याश्रममाह कौशिकम् ॥
कस्याश्रमश्चाति मनोरमो मुने ? क्षणं मनोमे वसितुं समीहते ॥५॥
रामात्समाश्रुत्य स कौशिकोमुनिर्विहस्य रामं समुवाच तत्र ॥
राम त्विदं गौतममाश्रमं शुभं पाषाणरूपात्र सुताऽब्जयोनेः ॥६॥
स्थिताच ते पादरजोऽभिवाञ्छया पुनीहि तां राघव ? पादरेणुभिः ॥
उक्त्वा च धृत्वा किल राघवाङ्गुलिं ययावरं यत्र शिलाह्यहल्याम् ॥७॥
रामस्तदा तां पतिशापपीड़ितां शिलास्वरूपां हि पदेनतत्र ॥
स्पृष्टाच पश्यत्सु जनेषु तस्माच्छिलास्वरूपात् प्रबभूव नारी ॥८॥
अहल्यया तत्र सुपूजितो हरिः कृतस्तुतिस्तस्य सुचेतसा तया ॥
पत्युःसमीपं प्रययौ पतिव्रता रामो विदेहस्यपुरं ययावरम् ॥९॥
सशेषरामेणयुतः स कौशिकः प्राप्तोयदा मैथिलराजधान्याम् ॥
भूपा बभूवुः किल राघवागमात् प्रातर्यथारवे प्रभवन्ति तारकाः ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वा विदेहोऽथ ससम्भ्रमं गतः सबन्धुभिस्तस्यमुनेः समीपम् ॥
दृष्ट्वा मुनिं राघवलक्ष्मणौ च सराघवं गाधिसुतं प्रपूजयत् ॥११॥
सौम्यासनस्थं नृवरैः प्रपूजितं सराघवं हर्षविलोलिताननम् ॥
मुनिं समालोक्य नृपस्तमब्रवीत् सुताविमौ कस्य सुसौम्यदर्शनौ ॥१२॥
नृपालपुत्रावृषिबालकोपमौ मनोजसौन्दर्य मदापहारकौ ॥
बालौदृशा चाम्बुरुहेण सर्वान् विलोक्य लोकान् वशमानयन्तौ ॥१३॥
निशम्यवाक्यं स जनाधिपस्य प्रोवाच रामस्य चरित्रमद्भुतम् ॥
नाम्नाप्रसिद्धौ किल रामलक्ष्मणौ सुताविमौ कोसलभूमिपस्य ॥१४॥
पितुःसमीपान्मख रक्षणायानीतौ मया बालकसत्तमौ द्वौ ॥
रामेण मार्गे विनिहत्य ताड़का ममाश्रमे यज्ञविहिंसकानाम् ॥१५॥
कृत्वाविनाशं बलदर्पितानां तथाब्जपादाद्विपिने ह्यहल्याम् ॥
पाषाणरूपां पतिशापसंयुतां विमुच्य सम्प्रेष्य प्रियस्य सन्निधिम् ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समागतावत्र विबुध्ययज्ञं स्वायम्वरं द्रष्टुमवेहि मैथिल ? ॥
वाक्यं समाकर्ण्य मुनेर्हितस्य भूत्वोतिहृष्टः स विविच्य भूपः ॥१७॥
ततोद्रुतं राघवसंयुतंमुनिं शुभालये सर्वसुखोपयुक्ते ॥
संस्थाप्य तं सम्प्रययौ विदेहः परं न रामस्य समीपतो मनः ॥१८॥

इतीश्रीमद्बालबोधरामायणे बालकाण्डे त्रितीयः सर्गः ॥३॥

रामस्तत्र समीक्ष्य पौरसुषमा मादाय चाज्ञां गुरो-
रुद्यानं प्रययौ स्वबन्धु सहितः सीता सखीभिर्वृता ॥
मातुर्वाक्यत एव तत्र गिरिजा पूजाविधौ संगता
दृष्ट्वा वर्त्मनि रामरूपमनुपं सख्यै मुदा प्राह सा ॥१॥
कोयं सर्वगुणैर्युतो नृपसुतः कन्दर्पदर्पापहं
रूपं विश्वविमोहनं हि मनसा प्रेम्णा विधात्राकृतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कान्त्या यस्य वनस्य सर्वतिमिरं सद्यः प्रविध्वंसितं
स्त्रीणां मन्मथवर्द्धनञ्च निखिलं कायम्प्रपश्यामलम् ॥२॥
रूपं पश्य समं न येनवपुषा कुत्रापि सम्वर्तते
जातंनैव न चेदृशं कमलजः कर्तुं पुनः संक्षमः ॥
श्यामां सौम्यनवोननीरदसमां कान्ति शरीरस्य यां
मुग्धं वीक्ष्य मनोमदीयमधुना कोयं वदत्वाशु माम् ॥३॥
सीते ! शीतकराननने ! शृणुशुभे ! रामेतिनाम्ना भुवि-
ख्यातोयं किल कोसलेशतनयः श्रीकौशिकेनान्वितः ॥
प्राप्तश्चात्र विदेहराजनगरे द्रष्टुं मखंधानुषं
सैवायं नरभूषणो नृपसुतो योग्यस्तवायं वरः ॥४॥
इत्याकर्ण्य सखीजनस्य वचनं किञ्चिद्विहस्यामला
सीता पूज्यतमां प्रपूज्य गिरिजां लब्धा ततो वाञ्छितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साद्ध मित्रजनैः परावृतवती पन्थानमालम्ब्यतं
रामेणाप्यवलोकिता कमलिनी सूर्येण रेमे मुदा ॥५॥
रामस्तामवरोधतोहि सहसा सं वीक्ष्यवै जानकीं
स्नेहादाह स लक्ष्मणं शशिमुखीं सीतां प्रपश्यामलाम् ॥
यस्याः कारणतोऽत्र भूमिपतयः प्राप्ताः सुसैन्यैर्युता
भाग्यात्पुण्यवशादिमां नरवराः प्राप्स्यन्ति नैवान्यथा ॥६॥
उद्यानं प्रसमीक्ष्य सर्वसुभगं ग्रामं दिदृक्षुर्भृशं
गच्छन् पौरजनान् प्रमोदभरितान् कुर्वन् सबन्धुर्मुदा ॥
वाप्यारामतड़ाग कूपभवनान्यालोकयन् सर्वतो
नार्यो राममवेक्ष्य मोदसहिताः सर्वाबभूवुर्गृहात् ॥७॥
एवं सौम्यपथेन सस्मितमुखो भ्रातान्वितोराघवो
गच्छन् तन्नगरस्य सौम्यसुषमां पश्यन् मिथोवर्णयन् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तः कौशिकसन्निधौ रघुवरो देवोपमो वीक्ष्यच
दोर्भ्यां सम्परिगृह्य तत्र मुनिना स्वांके समारोपितः ॥८॥
ततः सहर्षं मिथिलाधिराजो मुनेः सकाशादवगत्य सर्वम् ॥
सकौशिको राघवलक्ष्मणाभ्यां साकंययौ यत्र धनुःपिनाकिनः ॥६॥
तत्रोत्तमस्थानगतं सुमञ्चं तथैव चोच्चं च समस्तमञ्चात् ॥
निरीक्ष्य रामं मुनिलक्ष्मणाभ्यां सहैव संस्थाप्य,, तथान्यभूपान् ॥१०॥
निवेश्य चान्येषु सुमञ्चकेषु मध्येसभं दर्शितवान् पिनाकम् ॥
विलोक्य भूपाः प्रययुर्विभक्तु ं परं नते चालयितु ं समर्थाः ॥११॥
एकैकवारं शतशोऽथचायुतं दशायुतं सैन्ययुतामहीभुजाः ॥
धृत्वा धनुश्चालयितु ं न भूमितः शक्तास्तदालोक्य जगाद मैथिलः ॥१२॥
देशान् स्वकीयानुपयान्तु भूमिपा ज्ञाता मया वीरविहीन भूमिः ॥
धात्रा न भाले लिखितं सुतायाः पाणिग्रहं तेन वृथाद्यमत्कृतम् ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्यं तदाकर्ण्य रघूत्तमानुजो बद्धाञ्जलिःसन्निदमाह रामम् ॥
प्रभोऽनुभावात्तव जीर्णचापं करोमि खण्डं सहसाऽत्र भूमौ ॥१४॥
कथं तवाग्रेऽल्पमतिर्विदेहो ऽ वदन्नवीरः खलु भूमिमध्ये ॥
अतोऽपमानं न सहेयतं प्रभो ? तवाज्ञया सम्प्रकरोम्यनर्थम् ॥१५॥
कृत्वा करे कन्दुकवच्च भूमिं व्रजाम्यहं बालकवत् समन्ततः ॥
प्रभो महिम्नाऽद्य तवैवनिश्चितं बलं प्रपश्यन्त्वनुजस्य ते जनाः ॥१६॥
यदाऽवदत्कोपयुतः सुमित्रासुतस्तदा भूः परिकम्पिताऽसकृत् ॥
त्रस्ता महीपाः,, किल हर्षतांगता सीता विदेहः प्रबभूवलज्जितः,, ॥१७॥
रामस्तदा स्नेहयुतः स्वपार्श्वे निवेश्य तं प्राह दधस्व शान्तिम् ॥
इत्युक्तवन्तं तमुवाच कौशिको विभज्यतां राम ? धनुः पिनाकिनः ॥१८॥
श्रुत्वा मुनेर्वाक्यमनिन्दितस्तत् प्रणम्य पादौ किल कौशिकस्य ॥
रामोलघुस्तत्र पिनाकसन्निधौ गत्वा स्थितस्तस्य न हर्षविस्मयौ ॥१९॥

॥ इती श्री मद्बाल बोध रामायणे बाल काण्डे चतुर्थः सर्गः ४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नार्योऽथ भूपभवनात् प्रविलोक्यरामं श्यामंनवीनजलदोपम सौम्य गात्रम् ॥
सीतां विधाय विधिरत्र वरञ्च तस्याः सम्प्रेषितं सुनयनं प्रवदन्ति सर्वाः ॥१॥
गवाक्षरन्ध्रेण विलोक्य रामं नीलाम्बुजश्यामल कोमलाङ्गम् ॥
विदेहपत्नी स्त्रपतेः प्रतिज्ञां स्मृत्वा बभूवातिशयेन दुःखिता ॥२॥
विलोक्य तामन्य गजेन्द्रगामिनी जगाद शोकं त्यज साम्प्रतं शुभे ! ॥
कुतः समुद्रश्च कुतोहि कुम्भजः पीतःकथं तेन महात्मनाऽसौ ॥३॥

यश्चापो न चचाल भूपतिवरैः कृत्थापितुं भूमितो
वीरैस्तस्य विभञ्जनाय शुभगोबालः कथं वाञ्छति ॥
यस्येयं विमलाकृतिः कुसुमवत् सोऽयंलघुःशाम्भवं
चापं चालयितुं क्षमेतकठिनं कस्मादसौ बालकः ॥४॥
रूपञ्चेदमहो निसर्गमधुरं सम्प्रेषितं ब्रह्मणा
सीतायाः करपीड़नाय नियतं बालस्य सत्त्वं करे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दास्यत्येव,, कठोर तामपि हरेद्देवैष कोदण्डगां
शोकस्यात्र न कारणं शिशुरसौ चापं मुदा भङ्क्ष्यति ॥५॥
सीता शीतकरानना सुनयना युक्तासखीभिर्मुहात्
रामं श्यामल कोमलांगमखिलं संवीक्ष्य,, तातस्यच- ॥
अस्मिञ्छम्भुधनुर्विभञ्जनपणे प्रेमान्विता सा तदा
देवान् प्रार्थयतेऽस्म मोदितमना रामंपतीं देहि मे ॥६॥
स्तु / हेहेरम्ब-महेश-शेष-सुरपा ? धाता ? शिवे भारति ?
सर्वे यान्तु प्रसन्नतांहि विबुधाः ? सम्प्रार्थनातोऽद्यमें ॥
रामस्यास्य करद्वयेऽतिकठिनं सत्त्वं प्रयच्छन्तु ते
चापस्यास्य विभञ्जनाय कृपया मोदाय मे साम्प्रतम् ॥७॥
उक्त्वैवं समवीक्ष्य तत्र कठिनं दृश्यं गवाक्षात्सतो
वाक्यंप्राह सखीर्न कोपि जनकं गत्वाऽवदत्सादरात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हित्वेमं कठिनंपणं करुणया संवीक्ष्य रामञ्चमां
कन्यादानविधानतोऽद्य सहसा रामाय मां यच्छतु ॥८॥
रामोलाघवतस्तदा शिवधनुर्नीत्वा द्रुतं भूमितः
कृत्वा पद्मकरेण खण्डयुगलं भूमौःविनिःपातयत् ॥
भूमौ तत्पतनाद् बभूव निनदः सौदामिनीतोऽधिकः
तं श्रुत्वा श्रुतिघातकारकरवं लोका ययुःक्षुब्धताम् ॥९॥
स घोरनादो भुवनत्रयान्तरे स्थितेषु देवासुरमानवेषु ॥
विघातहेतोरभवत्तथाच भूतानि चान्यानि वितत्रसु भृंशम् ॥१०॥
तं नादमाश्रुत्य च जामदग्न्यः समाययौ मैथिलराजधान्याम् ॥
दृष्ट्वा धनुस्तत्र महेश्वरस्य द्विधाकृतंकेन वदाशु मैथिल ? ॥११॥
दृष्ट्वोग्ररूपं न शशाक भाषितुं पृथक् पृथक् भूमिपतिर्भयेन ॥
नत्वाऽब्रवोन्नामकुले स्वकीये पितुःसमाख्यां क्रमतोऽतिसम्भ्रमात् ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वा नृपाणामति सादितानां तनौ च तेषामति वेपथुं च ॥
रामोऽवदद्वाक्यमतीवभक्त्या मुनेः स्वरूपं किल जामदग्न्यम् ॥१३॥
मुने ? न दोषोऽत्र नृपावलीनां धनुर्महेशस्य मया विभक्तम् ॥
क्षमस्व नाथात्र ममापराधं क्षमैकसाराः प्रभवन्ति साधवः ॥१४॥
वाक्यं समाकर्ण्य रघूत्तमस्य प्रोवाच रोषात्खलु जामदग्न्यः ॥
चापं विभज्यात्र शिवस्य मे गुरोः करोषिवार्तां मम सम्मुखेकिमु ॥१५॥
हत्वा कुठारेण नृपात्मज ? त्वां प्रेष्यामि कीनाशगृहं सुनिश्चितम् ॥
रामानुजस्तस्य निशम्यवाक्यं क्रोधादिदंप्राह मुने ? शृणुत्वम् ॥१६॥
चापा अनेके समयेऽपि बाल्ये मया विभक्ता नच तत्र ते तमः ॥
कथं तवास्मिन् खलु शैवचापे प्रेमाधिकस्तं न वयं प्रविद्मः ॥१७॥
मुने ? न दोषोऽत्र रघूत्तमस्य यतः करस्पर्शत एव खण्डितम् ॥
मुनिस्त्वमेवं कथमब्रवीरिदं वाचोहि जल्पन्ति गतायुषोजनाः ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामानुजस्तेऽति विमूढबालको मयानिहन्येत कुठारधारया ॥
बालाधमोऽयं निधनाध्वगामी पापान्वितश्चास्य वधे न दोषः ॥१९॥
निशम्य वाक्यं द्विजसत्तमस्य रामानुजस्तं निजगाद रोषात् ॥
मुने ! न कोपादधिकं हि पापं कोपाभिभूतेन यतः स्वपाणिना ॥२०॥
कुठारधाराहतमातृकाणा मयुक्तमेतन्न भवद्विधानाम् ॥
कुठारमुद्यम्य स भीमविक्रमो विलोकयन् सास्रलोचनाभ्याम् ॥२१॥
रामानुजस्यास्य वधे न दोषो निशम्यतां कौशिकमब्रवीदिदम् ॥
दोषं गुणं चापिन बालकस्य विचारयेत् साधुजनो यतस्ततः ॥२२॥
क्षमस्व बालं तमुवाच गाधिजो रामोऽनुजं स्वस्य दृशान्यवारयत् ॥
त्रिःसप्तवारं खलु भूमिपालाः कुठारधारेण निपातिता मया ॥२३॥
नृपात्मजस्यास्य वधे ममायं यतः कुठारः खलु कुण्ठितोऽभूत् ॥
अतोन रामोहि मनुष्य ईश्वरो जातो धराभारनिवारणाय ॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विमृश्य चैवं खलु जामदग्न्यो ददौधनुःस्वं रघुनन्दनाय ॥
हेराम ? चापंहि रमापतेरिमं सन्धत्स्वबाणेन विधृत्य सर्वथा ॥२५॥
भवान् भवस्यास्य भवायजातो नवेति शङ्कां जहि राम ? मेऽत्र ॥
रामस्तदाकृष्य धनुः ससायकं कर्णान्तिकं कुत्र शरं क्षिपामि ॥२६॥
श्रुत्वा वचस्तद्रघुनायकस्य रामोऽवदन्मे वचनं क्षमस्व ॥
उक्तं मयाऽज्ञानवशात् प्रभोऽत्र शरस्त्वयं तिष्ठतु नैजकोशे ॥२७॥
साक्षात्परेशं मनसाऽवबुध्य नत्वापदाब्जे प्रजगाम सत्वरम् ॥
मेरौ तपस्तप्तुमतीव भक्त्या ग्रामोविदेहस्य बभूव सोत्सवः ॥२८॥

इती श्रीमद्बालबोधरामायणे बालकाण्डे पञ्चमः सर्गः ॥५॥

ततश्च भूमेस्तनया सखीभिर्वृता कराभ्यां स्रजमादधाना ॥
गत्वासभायां निजसैनिकैर्वृता गलेऽथ रामस्य ददौ मुदान्विता ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततश्च तस्मिन्नृपसंकुलांगणे विलोक्य शोभां खलु रामसीतयोः ॥
वृष्टिं प्रचक्रुः कुसुमप्रचारां मुहुर्मुहुर्मोदभरा दिवौकसः ॥२॥
मुनेऽचिरं प्रेषय पत्रमुत्तमं नृपः समादाय निजात्मबन्धून् ॥
सद्यः समागत्य करोतु पावनं पदार्पणादेव गृहं ममात्र ॥३॥
ततो विदेहानुमतः स कौशिकः सर्वंचरित्रं रघुनन्दनस्य ॥
दूतं विवाहस्य दिनं विलिख्य सम्प्रेषयामास नृपस्यसन्निधौ ॥४॥

पत्रं प्राप्य नृपोऽथ तत्र लिखितं वृत्तान्तमत्यद्भुतं
ज्ञात्वा पुत्रकृतं कृतीदशरथो हर्षाश्रुभिः संकुलः ॥
तस्मिन्नेवदिने वसिष्ठगुरुणासार्द्धं सुताभ्यांयुतः
प्रस्थानं कृतवान् वरात्रिकगणैः केत्वादियुक्तैर्मुदा ॥५॥

हयगजरथवाद्यै र्नृत्यगीतैरसंख्यै-
र्नृपगण युतसैन्यै र्मन्त्रिगुर्वादिभिश्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तनययुगल युक्ते लोकपेऽत्यन्तहृष्टे
व्रजतिसति सुमार्गे सर्वलोकाः प्रहृष्टाः ॥६॥
प्राप्तस्त्वयोध्याधिपतिर्हि तत्र विदेहराजस्य पुरान्तिके यदा ॥
आदाय वस्तूनि सुपूजनस्य ययौ विदेहः सहबन्धुभिर्मुदा ॥७॥
नृपालमौलिः किल कोसलाधिपं सबन्धुभिः सौम्यवरानुगैर्युतम् ॥
विलोक्य हर्षार्णवमग्नचित्तो विदेहराजः स विदेहतांगतः ॥८॥
सम्पूजयामास च कोसलेन्द्रं परस्परं क्षेममपृच्छतां मुदा ॥
क्षेमञ्च बुध्वा सुतयोर्विदेहात् गणैर्वृतो मैथिलगेहमन्वगात् ॥९॥
पुनर्विदेहो वरयात्रिकादीन् यथाक्रमं पूज्यतमान् प्रपूज्य ॥
सन्तोषयामास विधानतस्तान् नानाविधैः स्वादुमयैः सुभोजनैः ॥१०॥
रामस्ततो गाधिसुतानुजाभ्यांसहैव सद्यः पितुरन्तिकं ययौ ॥
प्रणम्य पादौ स विनीतवेशः पितुःसमीपं प्रविवेश सानुजः ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृपः सुतावेत्य मुदान्वितोऽभवद् व्यसुर्यथा प्राणमवाप सत्त्वरम् ॥
भूपोहि भक्त्या प्रणानाम कौशिकं मुनिर्नृपायाशिषमाशु सन्ददौ ॥१२॥
रामो वसिष्ठस्य पदारविन्दं नत्वाऽऽसने स्वे समुपाविवेश ॥
रामं सुमित्रातनयं गुरूञ्च संवीक्ष्य हृष्टो भरतो बभूव ॥१३॥
ततो विदेहः स्वगृहाङ्गणेमुदा समादिदेशाशु पुराधिवासिनः ॥
कर्तुं विधानेन सुमण्डपं तदा विवाहहेतोः खलु रामसीतयोः ॥१४॥

सीतायाः करतोहि षोड़शमितं नूत्नं शुभंमण्डपं
नानारत्न विभूषितं मणिमयैःस्तम्भैः सुसंशोभितम् ॥
चित्रैश्चर्चितमुत्तमै र्बहुविधैः कोणेषु सर्वेयुते
रम्भास्तम्भयुतं विधाय परितः स्रग्भिः समाभूषयन् ॥१५॥
भूपः स्वस्यगृहाङ्गणेऽतिमुदितः कार्याणि कुर्वन्स्थितः
पौराश्चापि गृहाणि तत्रनगरे सर्वाणिसंशोध्य च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वा मोदसमन्विताः सुभवने भूपस्य कार्याय ते
रामं कञ्जमुखं विलोक्य सुखिनः सर्वे बभूवुर्नराः ॥१६॥

इतीश्रीमद्बालबोध रामायणे बालकाण्डे षष्ठः सर्गः ॥६॥

ऋषिर्वसिष्ठः किल कौशिकोमुनिस्तथा शतानन्दपुरोहितादयः ॥
द्विजातयोन्ये श्रुतिशास्त्रपारगा ययुर्विदेहस्य गृहाङ्गणे मुदा ॥१॥

जनकनगरनारी राजिता हंसगत्या
मरचित मणिभूषा भूषिताङ्गी सखीभिः ॥
व्रजति नृपतिगेहं सर्वतो बद्धयूथा
विमलवसनचित्रैश्चर्चिताऽतीव रेमे ॥२॥

ब्रह्माणी शिवगेहिनीन्द्रगृहिणी कौबेरभार्याजवा-
दन्येषामपि नाकिनां युवतयो धृत्वा तनुं मानुषीम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जानक्याः करपीड़नं शुभकरं द्रष्टुं विदेहाङ्गणे
गायन्त्यः समुपाययुः प्रमुदिताश्चित्राम्बरैः संवृताः ॥३॥
तथारुद्रश्चार्को वरुणधनपौ सोमशमनौ
विधातादेवेन्द्रो जनकनगरे सौम्यवपुषा ॥
मुनेस्तस्यांरात्रौ मनसि बहुमोदेन सहिता
ययुर्द्रष्टुं सर्वे जनकनगरे कान्तिमतुलाम् ॥४॥
गन्धर्वोरगकिन्नराश्च वहवो देवास्तथान्येऽखिलाः
सर्वे तत्रसमाययुर्हि गगने द्रष्टुं विवाहं तयोः ॥
दृष्ट्वा नेत्रमहोत्सवं हि मुमुचुः पुष्पाणि ते व्योमत-
स्तास्मिन् सौम्यदिने विदेहनगरे मेघा यथैवामृतम् ॥५॥
नेदुर्दुन्दुभयो दिविप्रननृतुर्देवाङ्गनाः सादरं
गायन्त्योऽतिमुदान्विताः सुबहवो रामस्य सौम्यं यशः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पौरैर्जानपदैर्महीपतिगणैर्वाराङ्गिकैः शोभितं
ग्रामं वीक्ष्य मुदान्विताःसुरगणाः सर्वे बभूवुर्भृशम् ॥६॥
भूपः स्वस्यगृहाङ्गणेऽतिमुदितः सं वीक्ष्य कालं शुभं
रामं लक्ष्मणसंयुतं च भरतं भ्रात्राऽन्वितं सादरम् ॥
सर्वान् वै पितुरन्तिकात्स्वभवने चानीय देवोपमान्
संस्थाप्यामल पीठकेषु विधिवत् पूज्यान् मुदाऽपूपुजत् ॥७॥

सीतांसमानीय सुरत्नभूषितां समावृतां सौम्यसुवासिनीभिः ॥
संस्थाप्य रामस्य पुरो विदेहः समार्पयत्तां रघुनन्दनाय ॥८॥
रामस्यदक्षिणकरोपरि भूसुतायाः कृत्वा करं कमलवन्नृपमैथिलश्च ॥
धृत्वा करोपरिकरं स्वकरेण तत्र पाणिग्रहस्यविधिना प्रददौ विदेहः ॥९॥
सीता मया रत्नविभूषिता ते प्रदीयते राघव ! गृह्यतामियम् ॥
फलं सुतादानजमाप्नये त्वं प्रसीद दोषं च मम क्षमस्व ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः स्वकन्यां खलु चोर्मिलाख्यां शेषावताराय ददौ नृपः पुनः ॥
भ्रातुस्तनूजां श्रुतिकीर्तिमाददौ कैकेयिपुत्राय., पुनः स माण्डवीम् ॥११॥
शत्रुघ्नसंज्ञाय ददौविधानतस्ततश्च तेभ्यो वहुपारिवर्हम् ॥
दत्त्वा सुसत्कृत्य वराात्रिकेभ्यो योग्यानुसारेण विबुध्य भूपतः ॥१२॥
जामातृकान् वस्त्रविभूषणैर्युतान् विभूषिताभिः सह भूसुताभिः ॥
संस्थाप्य भूपः शिविकोत्तमेषु विविच्य कालं शुभदं वसिष्ठात् ॥१३॥
सम्प्रेषयामास च राजधानीं स राघवीं स्वस्यसुयाष्टि कैर्युतम् ॥
सीताऽथ तस्मिन् समये नृपस्य पादौ गृहीत्वा कुरुतेस्म-रोदनम् ॥१४॥
विदेहराजोपि रुरोद तत्र श्रुत्वा सुतायाः परिरोदनं तत् ॥
विधृत्य धैर्यं स सुतामवोधयत् स्वल्पेनकालेन पुनर्हिकोसलात् ॥१५॥
समानयिष्यामि सुनिश्चितं सुते ? रोदीत्र्थथा मा समये सुमङ्गले ॥
विदेहपत्नी समुपेत्य सीतां विहायधैर्यं कुरुतेस्म रोदनम् ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सीता कराभ्यां परिगृह्य मातुर्ग्रीवां विलापा दरुदद्भृशं सा ॥
रुरोद सीता स्वसखीगणैः पृथक् पृथङ् मिलित्वाऽतिशयेन प्रेम्णा ॥१७॥
ददुः शुभामाशिषमाशु ताश्च सीते ? भवत्वं पतिवल्लभा सदा ॥
प्रयाणकाले समुवाच रामं बद्धाञ्जलिःसन् मिथिलाधिराजः ॥१८॥
क्षमस्व सर्वं ममदौर्मनस्यं निशम्य रामः प्रणनाम मैथिलम् ॥
सम्प्रार्थयामास नृपं विदेहस्त्रुटिर्न गण्या ममपारिबर्हे ॥१९॥
योग्यंन ते भूप ? बभूव किञ्चिन् ममात्मजायाः परिपातुमर्हसि ॥
त्रुटिर्न किञ्चित्तव पारिबर्हे प्राप्तं मया सर्वमतीवशोभनम् ॥२०॥
क्षमस्व मत्संगमजन्य दोषं वरात्रिकानामपि तं क्षमस्व ॥
एवं मिथस्तत्र बभूव भूपयोर्यथोचिता सामयिकीसुवार्ता ॥२१॥
साकेताधिपतिर्विदेहनगरात् सम्प्रस्थितो बन्धुभिः
सामात्यैः सवरात्रिकैः स गुरुभिः पुत्रादिभिः संयुतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्गे मैथिलनायकस्य विधिवत् सौम्यादरादेस्तथा
भोज्यान्नस्य च वर्णनंहि विविधं कुर्वन् ययौ कोसलम् ॥२२॥
श्रीरामं सहसीतया स्वभवने प्राप्तं च कौसल्यया
मात्रा साक्षत दूर्वयाम्बुदधिभिः सौम्याशिषः कारिताः ॥
कैकेय्या च सुमित्रया सह चिरं योषिद्भिरत्यादृतं
सार्द्धं सामयिकीं सुमङ्गलमयीं सौम्याशिषं सन्ददौ ॥२३॥
श्रीरामः कुरुतेस्म मोदमनसा भूपाज्ञया बन्धुना
सार्द्धं तद्दिनतः सुकार्यमखिलं पौरान् जनान् पालयन् ॥
आहूतो भरतः स्वबन्धुसहितो भ्रात्रा जनन्या मुहु-
र्नन्दिग्राममितो ययौ शुभदिने पित्राज्ञया सत्वरम् ॥२४॥

इतीश्रीमद्बालवोधरामायणे वालकाण्डे सप्तमः सर्गः ॥७॥

॥ इति बालकाण्डम् समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥*॥ अथायोध्याकाण्डम् ॥*॥

राज्यं यः प्रविहाय काननमगाद्रामोऽनुमोदान्वितो
देवानां सुखहेतवेऽतिकृपया दुःखस्य नाशाय च- ॥
भक्तानां मखकारिणां वसुमती भारापहाराय च
तं नत्वा प्रकरोम्यहं स्फुटतरं काण्डं द्वितीयं शुभम् ॥१॥
श्रीरामं रहसिस्थितं सुरमुनिर्ज्ञात्वाऽथ रामान्तिकं
सम्प्राप्याह हरिं हरे ? कथमिदं सर्वं त्वया विस्मृतम् ॥
भूमेर्भार निवारणाय भुवने प्राप्तः परं ते पिता
राज्यं दास्यति तेन भारहरणं भूमेः कथं जायताम् ॥२॥
श्रुत्वा नारदभाषितं रघुवरः प्रीत्याऽब्रवीत्तं मुनिं
श्वो यातास्मि सुदण्डकं शृणु मुने ? सीताभिषेणाश्रुतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुष्टं ब्रह्मकुलोद्भवं दशमुखं पुत्रादिभिः संयुतं
युद्धे सैन्यसमन्वितं निशिचरं हत्वाऽऽगमिष्याम्यहम् ॥३॥

श्रुत्वा स रामस्य विभाषितं वचो मुनिर्ययौ नाकमतीवहर्षात् ॥
जगाद सर्वं रघुनाथ भाषितं बभूवुराश्रुत्य सुराः प्रहर्षिताः ॥४॥

ततश्च तस्मिन् दिवसे महीपतिर्वसिष्ठमाहूय वचो बभाषे ॥
गुरोऽखिलाः पौरजना नितान्तं रामंप्रशंसन्ति भृशं ममाग्रे ॥५॥

तेनाशु रामं सरसी रुहाननं राज्येऽभिषेक्ष्यामि सुचेतसाऽहम् ॥
श्वएव दातास्मि तवाज्ञया गुरो ! नास्त्यत्र कैकेयिसुतः सहानुजः ॥६॥

राज्याभिषेकाय शुभानि यानि वस्तूनि चान्यान्यखिलानि तानि ॥
चेतुं समाज्ञापय मन्त्रिसत्तमं सुमन्त्रसंज्ञं विधिवन्मुने ! द्रुतम् ॥७॥

गत्वा समाज्ञापय चैकभुक्तं करोतु रामः सहसीतयाऽद्य ॥
त्वया भवायाशु विधिर्विधीयतां कार्येऽत्र विघ्नस्य निवारणाय ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुं समाभाष्य नृपः स्वयंययौ कार्यान्तरेऽत्यन्त प्रसन्नमानसः ॥
सुमन्त्रमाहूय मुनिस्तमब्रवीत् विभाषितं भूमिपतेर्यथावत् ॥९॥
मुनिः सुमन्त्रं पुनरब्रवीद्वचस्तीर्थोदकैः पूरितरत्नकुम्भान् ॥
कन्यास्तथा षोड़श रत्नभूषिता स्छत्रं कुशांश्चामरमजुंनञ्च ॥१०॥
गजं चतुर्दन्तयुतं तथैव नानाविधं स्रङ् मणिरत्नमानय ॥
भूपास्तथोपायन पाणयश्च तिष्ठन्तु सैन्यानि सुसज्जितानि ॥११॥
गजालिभिः श्वेततुरङ्गपङ्क्ति भिनृपस्यगेहाजिरमस्तु संकुलम् ॥
ब्रह्मर्षयस्तत्र सुदर्भपाणयस्तिष्ठन्तु वन्दीजन वाद्यगायकाः ॥१२॥
गृहाणि सर्वाणि सुसंस्कृतानि कुर्वन्तु सर्वेनगराधिवासिनः ॥
नानोपचारैर्विधिवत् सुरार्चनं कुर्वन्तु विप्राः प्रतिमन्दिरं च ॥१३॥
सुमन्त्र ? सत्यं शृणु संप्रभाते सर्वंसमादाय निकेतनाजिरे ॥
स्थातास्यवश्यं मम वाक्यतस्त्वं रामाभिषेकाय सुयत्नतश्च ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुमन्त्रमादिश्य मुनिः स्वयं ययौ रामालयं सन्मनसाऽतिशीघ्रम् ॥
गुरुं समालोक्य ननाम रामः प्रक्षाल्य पादौ सहसीतया तम् ॥१५॥
संस्थाप्य मांणिक्यमयेशुभासने सम्पूज्य पादाविदमाह तत्र ॥
धन्योऽहमत्राद्य तव प्रपूजनाच्छ्रुत्वा मुनिश्चाह विहस्य रामम् ॥१६॥
जानाम्यहं राम ! तव प्रपञ्चं यथा यथा त्वं प्रकरोषि मायाम् ॥
परं न वाच्यं त्विह कस्यचिन्मया लोकानुसारेण यतस्त्वयोक्तम् ॥१७॥
लब्धासिराज्यं सुखतः श्व एव नृपाज्ञया ते परिबोधनाय ॥
समागतोहं सहसीतयात्वं कुरुव्रतं चाद्य जितेन्द्रियोभव ॥१८॥

इती श्रीमद्बालबोधरामायणे अयोध्याकाण्डे प्रथमः सर्गः ॥१॥

एवं समाभाष्य ययौ वसिष्ठस्तदैव देवा गगनात्सरस्वतीम् ॥
गत्वा समूचुर्व्रज देवि ! भूमौ रामाभिषेके कुरुविघ्नमुग्रम् ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रविश्य दासीं किल मन्थरां,, सुतां कैकेयराजस्य सुरस्य कार्यम् ॥
कृत्वा पुनः स्वर्गमुपेत्य सुव्रते ? सुरासुरैर्मर्त्यजनैः प्रपूज्यसे ॥२॥
स्वीकृत्य वाक्यं खलु देवतानां देव्या समागत्य तथैव तत्कृतम् ॥
ततस्त्वयोध्यानगरस्यशोभा मलौकिकीं तां किल मन्थराख्या ॥३॥
विलोक्य गत्वा किल मातुरन्तिकं प्रोवाच शोभा कथमीदृशी पुरः ॥
सुते ? शृणुत्वं भविता प्रभाते रामाभिषेकः परमोत्सवोहि ॥४॥
अतोऽद्य शोभापरमा प्रदृश्यते श्रुत्वा ययौ केकयजान्तिकं सा ॥
वाण्याभिभूता समुवाच कैकयीं शेषे कथं किन शृणोषि राज्ञि ? ॥५॥
प्राप्तं भयंतेऽद्य भयंकरं यद्रामाभिषेकोभविता प्रभाते ॥
श्रुत्वा ददौ सा किल मन्थरायै सौम्यानि रत्नाभरणानि मोदात् ॥६॥
प्रपच्छ दासीं कथयत्वमद्य रामाभिषेकात् कथमाविशेद् भीः ॥
पुनर्नवाच्यं मम सन्निधाविदं रामाद्भयं मे नहि सम्भविष्यति ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामोहि मां स्वांजननीञ्च सम्यक् समं सदा पश्यति किं ततो भयम् ॥
सत्यं भवेद्देवि ! महद्भयं ते यतः सुतं ते कपटेन भूःक्षिपः ॥८॥
सम्प्रेष्य ते पैत्रिकमत्र राज्यं रामाय भूपः प्रददाति तेन ॥
वाचा सदा तोषयते नृपस्त्वां करोति कार्यं शृणु राममातुः ॥९॥
अतः सुतस्ते प्रभवेद्धि किंकरो रामस्य सत्यं त्वमपीह किंकरा ॥
श्रुत्वा तदा मन्थरयाविभाषितं वाण्याभिभूता समुवाच कैकयी ॥१०॥
यथा सुतोमे प्रलभेत राज्यं तथावदेः किंकरणीयमद्य ॥

इति श्रीमद्वालवोधरामायणे अयोध्याकाण्डे द्वितीयसर्गः ॥२॥

तयोदितं तत् परिश्रुत्य दासी सामन्थराख्या समुवाच कैकयीम् ॥
शुभे ! शृणुत्वं वचनं ममेदं पुरातनं संस्मृतमद्य मातः ! ॥
श्रुतं मया त्वन्मुखतोऽत्र देवि ! नृपोहि देवासुरयोः प्रसङ्गरे ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वामब्रवीद्ब्रूहि वरद्वयं प्रिये ? दास्याम्यहं ते स्वमनोभिवाञ्छितम् ॥
वरद्वयंतिष्ठतु न्यासभूतं चिरंहि त्वय्येव नरेन्द्र ? सुव्रत ? ॥३॥
यदा भवेन्मेऽवसरस्तदैव संयाचिताहे नृपमब्रवीस्त्वम् ॥
अतस्त्वमद्यैव विशत्वरं शुभे ? कोपालये कोपसमन्विता च ॥४॥
विकीर्य भूमौ परितोहि भूषणं विधृत्य चातीव मलीनवासः ॥
कुरुष्व शयनं प्रविहाय शय्यां भूमौ,, नृपं बोधयितुं हितत्र ॥५॥
यदाव्रजेत्तत्र,, नृपंसुसत्यं त्वंकारयित्वाऽथ वरद्वयं लभेः ॥
एकेन राज्यं स्वसुतस्य भूपतश्चतुर्दशाब्दान्मुनिरूपतो वने ॥६॥
रामो व्रजेदाश्वपरेण तेन ततोद्भुतं तेऽतिशुभं भविष्यति ॥
श्रुत्वा तदा मन्थरया विभाषितं कोपंपरं सा मनसाऽऽवहन्ती ॥७॥
कोपालयं प्राप्य तथैव तत्कृतं नृपोविशत्सौम्यमनाः स्वमङ्गणम् ॥
दृष्ट्वा न भूपः किल कैकेयीं प्रियां पप्रच्छ दासीनिकरं क सा गता ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौम्यानना कोपगृहं गता प्रभो ? प्रोचुश्चतास्तत्र ययौ नृपः स्वयम् ॥
धृत्वाकरं स्वस्यकरेण तस्याः पप्रच्छ भूपोऽतिभयेन भामिनीम् ॥९॥
विहाय भूपांवरसौम्यशय्यां भूमौ प्रशेषे न कथं विभाषसे ॥
जानासि नित्यं स्ववशेस्थितं मां तथापि शोकः क्रियते वृथैव ॥१०॥
त्वद्वाञ्छितं सम्प्रकरोमि निश्चितं सुदुर्लभंचापि न तत्र संशयः ॥
प्राणात्प्रियं राममवेहि मे प्रिये ? करोम्यहं तच्छपथंहि निश्चितम् ॥११॥
धनान्वितं रङ्कसमं तवाज्ञया करोमि रङ्कं सधनं न संशयः ॥
श्रुत्वा शपन्तं किल रामचन्द्रं विमृज्यनेत्रे च समुत्थिता सा ॥१२॥
नृपं ययाचे भरतायराज्यं रामं ययाचे विपिने निवासितुम् ॥
चतुर्दशाब्दान्मुनिरूपतो द्रुतं नचेन्मरिष्यामि तवाग्रतोऽहम् ॥१३॥
पुनः समायातु ततः परं गृहं वनेऽथवा तिष्ठतु रामचन्द्रः ॥
श्रुत्वा नृपस्तद्वचनं कठोरं पपात वज्राहत सद्द्रुमो यथा ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवाप्यसंज्ञामवदन्नृपः पुनर्धृत्वापदं युग्मकरेण तस्याः ॥
गृहाण राज्यं स्वसुताय शोभने ? रामोऽपि वासं प्रकरोतु कोसले ॥१५॥
कथं प्रिये ? प्राणहरं ममेदं वाक्यं त्वमस्मिन्समयेऽब्रवीषि ॥
भयञ्च ते नैव भवेद्धि रामाच्छ्रुत्वेति वाक्यं समुवाच सा नृपम् ॥१६॥
रामस्य सत्यं शपथं हि कृत्वा करोषि सत्यव्रत ? किं त्वमन्यथा ॥
चेत्स्त्रीयवाक्यं नकरोषि भूपते ? गमिष्यसि त्वं निरयं सुनिश्चितम् ॥१७॥
श्रुत्वा पुनर्वाक्यमतीवघोरं नृपः पुनस्तत्र विसंज्ञकोऽभवत् ॥
मन्त्री समादाय गुरोरनुज्ञया द्रव्याणि भूपस्यगृहाजिरे स्थितः ॥१८॥

इति श्रीमद्बालबोधरामायणे अयोध्याकाण्डे त्रितीय सर्गः ॥३॥

कोलाहलं तत्र नृपस्यगेहे चकार राज्ञां रथवाजिकुञ्जरम् ॥
जनाश्च सर्वे प्रवदन्ति तत्र कदाप्रभातं प्रभवेत्सुखप्रदम् ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृपः कथं नाद्य गृहाद्विनिर्गतो जाते प्रभाते न जहौ सुशय्याम् ॥
राज्याभिषेकं प्रकरोतु भूपतिर्दृष्ट्वा वयं लब्ध मनोरथाश्च ॥२॥
सिंहासनस्थं जनकात्मजान्वितं किरीटयुक्तं नवमेघसौभगम् ॥
विलोक्य रामं नवकञ्जलोचनं कदा भवेयुर्हि नराः प्रहृष्टाः ॥३॥
दृष्ट्वा सुमन्त्रोऽवनिपैः समाकुलं द्वारं तथा जानपदैः सपौरैः ॥
नानोत्सवैर्नृत्यसुगीतवाद्यैः समावृतं किंन नृपः समागतः ॥४॥
विशङ्क्य मन्त्री नृपराजसन्निधौ गत्वाऽथ दृष्ट्वा नृपतिं विचेतनम् ॥
पप्रच्छ हेतुं किल कैकयीं तदा नृपः कथं देवि ? विदृश्यतेऽन्यथा ॥५॥
रामं समानीय नृपंप्रदर्शय द्रुतं भवेद् भूमिपतिः सचेतनः ॥
तदाऽऽह मन्त्री नृपतेरनुज्ञां विना कथं यामि पदात्परं वद ॥६॥
सुमन्त्रमालोक्य नृपस्तमब्रवीद् रामं समानीय प्रदर्शय त्वम् ॥
ततः स रामालयमेत्य मन्त्री नृपाज्ञया राम ? नृपान्तिकं व्रज ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततो हि रामः सहमन्त्रिणा ययौ पितुः समीपं प्रणनाम तातम् ॥
दृष्ट्वा नृपं तत्र विचेतनं स प्रोवाच कैकेयसुता मिदं वचः ॥८॥
मातः पिता मेऽत्र विचेतनः कथं श्रुत्वाऽ ब्रवीद्राममिदं स्मितास्या ॥
राम ? त्वमेवास्य कुरुष्व कार्यं दुःखस्यनाशाय सुखाप्तये पितुः ॥९॥
नृपः प्रवक्तुं त्वयि लज्जितोऽत्र रामोऽतिदुःखादिदमाह कैकयीम् ॥
कथं न वक्तीह ममान्तिके पिता करोमि कार्याणि पितुर्हिताय ॥१०॥
त्यजामि सीतां प्रजहामि मातरं प्राणान्प्रदास्यामि सुखाप्तये पितुः ॥
श्रुत्वा च सर्वं समुवाच कैकयी नृपोऽत्र राज्यं भरताय दत्तवान् ॥११॥
त्वामब्रवीत् काननमेतु दण्डकं चतुर्दशाब्दान्मुनिवेषमुद्वहन् ॥
विहस्यरामः समुवाच मातरं ममानुजोऽत्र प्रकरोतु राज्यम् ॥१२॥
अहं गमिष्यामि सुखेन काननं पिता न कस्मादिह सम्प्रभाषते ॥
श्रुत्वा तदा रामविभाषितंवचो नृपोऽतिकृच्छ्रादिदमाह रामम् ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रियाजिते सत्यगुणैर्निबद्धे कामातुरे पुत्र ! मयिप्रसीद ॥
रामः सुवाक्यैः पितरं प्रबोध्य नत्वा स कैकेयसुतामुवाच ॥१४॥
मातः स्वमातुः प्रणिपत्यपादावाश्वास्य सीतामपि याम्यहं वनम् ॥
एवं समाभाष्य ययौ स्वमातुर्गृहं स रामाभ्युदयेऽस्यमाता ॥१५॥
सम्पूजयन्तीं विधिवद्धरेः सा निमीलिताक्षी न ददर्श रामम् ॥
प्रबोधयामास ततः सुमित्रा तां पश्य रामं गृहमागतं च ॥१६॥

इतीश्रीमद्बालबोधरामायणे अयोध्याकाण्डे त्रितीय सर्गः ॥३॥

श्रुत्वा बहिर्दृष्टिमपातयत्तदा दृष्ट्वाङ्कमारोप्य सुतं बभाषे ॥
विभुङ्क्ष्वपुत्रेति बुभुक्षितस्त्वं सुमृष्टमन्नं,, नहि मेऽशनस्य- ॥१॥
कालोऽस्ति मातः शृणु याम्यहं वनं पितुर्निदेशादघुनैव दण्डकम् ॥
श्रुत्वेति शोकाकुलिताऽब्रवीत्सा कथं पिता ते प्रददौहि काननम् ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिता ददौ मे भरतस्यमात्रे नृपं ययाचे वरयुग्ममाशु ॥
एकेन राज्यं भरताय मां वनं चतुर्दशब्दाँस्त्वपरेण तेन ॥३॥
अतो दयालुः प्रददौ पिता मे श्रुत्वाऽतिशोकाकुलमानसाऽब्रवीत् ॥
पित्राज्ञया चेद् विपिनं प्रयासि निवारयामीह वनं नगच्छ ॥४॥
मद्वाक्यमुल्लङ्घ्य नृपस्यवाक्यतो गन्तासिचेद् यामि यमालयेऽहम् ॥
सम्पाद्य वाक्यं स्वपितुर्हि तत्र समागमिष्यामि तवान्तिकेऽचिरात् ॥५॥
निषीद मा तिष्ठ गृहेऽतिशोभने श्रुत्वेतिवाक्यं समुवाच लक्ष्मणः ॥
वाक्यं न युक्तं खलु बालवृद्धयोस्ततोऽभिषेकाय यतस्व राघव ? ॥६॥
निहन्म्यहं तत्र विपक्षगामिनं तथाच कैकेयिसुतं समातुलम् ॥
रामोऽब्रवीद्वत्स ? धनुर्धरश्चेद् यदिच्छसित्वं प्रभवेन्नसंशयः ॥७॥
परं पितुर्वाक्य विरोधकृत्सुतः करोति कार्यं निरयं व्रजेद्ध्रुवम् ॥
रज्यं सुखं वैभवमत्र भूमौ विज्ञाय छायामिव सर्वमेतत् ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतः क्षमस्वाद्य विहाय कोपं सुखेषु दुःखेषु निषीद मा त्वम् ॥
प्रपश्य भेकोऽहिगलान्तरस्थः समीहते भोक्तुमतीव भक्ष्यम् ॥९॥
तथैव लोकाः किल कालसर्पैग्रस्ताश्च भोगे प्रभवन्ति लोलुपाः ॥
वाक्यं समाकर्ण्य स राघवस्य हित्वा तमः शान्तिमधारयच्च ॥१०॥
यास्याम्यहं नाथ! सहत्वयैव कुर्तुं सुसेवां तवपादपद्मयोः ॥
नयस्व नोचेन्न दधामिजीवं व्रजामि सत्यं सदनं यमस्य ॥११॥
वाक्यं समाकर्ण्य स लक्ष्मणस्य रामोऽवदत्तात ? वनंव्रजत्वम् ॥
शेषः प्रसूं स्वां किल राममात्रे समर्प्यसद्यः प्रबभूव हर्षितः ॥१२॥
धृत्वा धनुस्तत्र वनस्य मार्गे व्यवस्थितो गन्तुमतीवहर्षात् ॥
रामः सुमित्राञ्च तथा स्वमातरं प्रणम्य चाश्वास्य तयोः शुभाशिषम् ॥१३॥
आदाय सद्यः प्रजगाम मन्दिरं सीतापतिः श्रीजनकात्मजायाः ॥
पत्युः समालोक्य मुखाम्बुजंस्मितं सीता समादाय जलं सुपात्रात् ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रक्षाल्य पादौ स्वपतेः पतिव्रता बद्धाञ्जलिः सा पतिमावभाषे ॥
पते ? किरीटादिविवर्जितः कथं तथान सैन्यं प्रविलोक्यते मया ॥१५॥
कथं न वाद्यानि वदन्ति ते पुरः पद्भ्यां कथं नाथ ? समागतो वद ॥
वाक्यं समाकर्ण्य स भूसुतायाः विहस्य रामः समुवाच सीताम् ॥१६॥
पित्राज्ञयाऽद्यैव वनंसुदण्डकं यस्यामि सद्यः सहलक्ष्मणेन ॥
वत्स्यामि तत्रैव चतुर्दशाब्दान् धैर्यंसमासाद्य गृहेवसत्वम् ॥१७॥
निशम्यवाक्यं स्वपतेः पतिव्रता सीता सशोकं समुवाच रामम् ॥
पित्राकथं तेऽतिमहात्मना त्वं सम्प्रेष्यसे काननवासहेतोः ॥१८॥
विहाय यस्त्वां न पलंप्रसन्नः सएव किं निष्ठुरतामधारयत् ॥
पुरापिताऽदाद् भरतस्यमात्रे वरद्वयं सम्प्रति सा ययाचे ॥१९॥
एभिः समग्रैर्भरतायराज्यं चतुर्दशाब्दान्ममकाननं प्रिये ? ॥
श्रुत्वा स्वपत्युर्वचनं सहर्षं सीताऽवदत्त्वत्प्रथमं हि काननम् ॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यास्यामि,, पश्चाद्वनमेष्यसित्वं विहाय मां ते गमनं न सौम्यम् ॥
रामः प्रियांप्राह वनं कथं त्वां नेष्यामि बाले ? कुशकन्टकान्वितम् ॥२१॥
चरन्त्यरण्ये खलु दुष्टजन्तवो दृष्ट्वाहि प्राणान् परिहास्यसित्वम् ॥
तथाऽशनं तत्र दिने दिने प्रिये ? नलप्स्यसे स्वादुमयं कथञ्चन ॥२२॥
काले कथं क्वाप्यतियत्नतः फलं प्रलप्स्यसे तिक्तकषायमिश्रम् ॥
अतो वसात्रैव शुभे ? शुभालये मां द्रक्ष्यसित्वं पुनरेव सत्त्वरम् ॥२३॥
कुरुष्व सेवां मम मातुरत्र ब्रवीमि सत्यं शृणु मे प्रियेत्वम् ॥
श्रुत्वावचस्तत्स्वपतेर्हि सीता प्रोवाच रामं शृणु मे वचस्त्विदम् ॥२४॥
सार्द्धं त्वया नाथ ? वनेऽतिघोरे कुशाश्च काशाः खलुकण्टकादयः ॥
सर्वे भविष्यन्तिसुकोमलास्ते भुक्तावशेषं तव मे सुधासमम् ॥२५॥
शृणोतु मां ज्योतिष शास्त्रवेत्ता वदद् भवत्या विपिने निवासः ॥
पत्यासहैव प्रभविष्यतिध्रुवं ततो गमिष्यामि वनं त्वयासह ॥२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नतत्र दुःखस्य विधायिनीस्यामहं भविष्यामि तवार्थसाधिनी ॥
अतो नयत्वं विपिनं प्रभो ? मां प्राणान् विहास्यामि तवाग्रतोऽन्यथा ॥२७॥
दुराग्रहंवीक्ष्य जगाद रामो सीते ? व्रजत्वं विपिनं मायासह ॥
संमिल्य तत्रैव स लक्ष्मणांप्रियं बभूवुरत्यन्त मुदान्वितास्ते ॥२८॥
रामोऽथ विप्राय गवांशतं ददौ रत्नानि वासांसि च भूषणानि ॥
ददौ स्वमित्राय पुरोऽधिवासिने तथाच पित्रोः परिसेवकेभ्यः ॥२९॥
सीता स्वहारान् निजभूषणानि महार्हं मुक्तामणि निर्मितानि ॥
दत्वा मुदा ग्रामनिवासिनीभ्यो जग्मुर्नृपं राजपथेन सर्वे ॥३०॥

इतीश्रीमद्बालबोध रामायणे अयोध्याकाण्डे चतुर्थः सर्गः ॥४॥

श्रीरामं सहसीतयाऽनुजयुतं मार्गेव्रजन्तंजवाद्
दृष्ट्वा जानपादाः कुतूहलदृशः पौरास्तथाभूमिपाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुञ्चन्तोऽश्रुकणान् विषादमनसो ज्ञात्वाविधात्राकृतं
सर्वे ते विपरीतकार्यकुशलं निन्दन्ति पद्मोद्भवम् ॥१॥
विधायरूपं विधिनाऽतिसौभगं कथं सुभाले लिखितोविवासः
नृपः कथं वा प्रददौ वरन्त्विदं प्रोचुर्जना जानपदाश्च सर्वे ॥२॥
श्रुत्वेतिवाक्यं जनसंघमध्ये जगाद युक्तं खलु वामदेवः ॥
कुरुष्व रामस्य न दुःखशंकां यतो न रामो मनुजस्त्रिलोकपः ॥३॥
मुनीश्वरं ब्रह्मसुतं हि नारदं पूर्वेद्यु रेवाप्रतिमप्रभावम् ॥
याताम्स्यरण्यं श्व उवाच राघवस्तदत्र शोकस्य न कारणंकिमु ॥४॥
श्रुत्वाबुधा मोदमुपाययुर्भृशं प्रापुः पुनर्मोहमतीव चान्ये ॥
रामो ययौ लक्ष्मणजानकीभ्यां सहैव भूपान्तिकमाशु मन्दिरे ॥५॥
रामोऽब्रवीत्केकयनन्दिनीमिदं बद्धाञ्जलिर्भूय पुरोऽतिनम्रात् ॥
मातः ! पितुर्वाक् परिपालनाय वयं व्रजामो विपिनं सहर्षम् ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ददस्व चाज्ञां गमनाय मातस्ततोऽदद् वल्कलमाशु तेभ्यः ॥
रामोऽदधत्तं खलुलक्ष्मणोपि सीतानजानाति किमस्य कार्यम् ॥७॥
कृत्वा करे वल्कलमब्जनेत्रा रामाननं पश्यति साभिलाषम् ॥
वस्त्रान्तरेणान्तरितां विधाय न्यधापयत्तां स्वयमेव वल्कलम् ॥८॥
विलोक्य सर्वे रुरुदुर्निशान्ते यतो न योग्यं खलु तत्र दृश्यम् ॥
श्रुत्वा वसिष्ठः प्रययौ हि तत्र विज्ञाय सर्वं किल कैकयी कृतम् ॥९॥
उवच तां पापिनि नास्ति ते दया वनाम्बरं दत्तवती यतोऽस्यै ॥
प्रणम्य रामः पितरं सुभक्त्या प्रदक्षिणं सानुजसीतया च ॥१०॥
कृत्वा समास्वास्थ गृहान्नृपस्य सम्प्रस्थितो भूमिसुताऽनुजाभ्याम् ॥
वनाय,, दृष्ट्वा नृपतिर्हितत्र सुमन्त्रमाहातिशुचा स सद्यः ॥११॥
जायाऽनुजाभ्यांसहितं हि रामं कृत्वा रथे काननमाशु सम्व्रज ॥
सन्दर्श्य सार्वान् विपिनं त्वमद्य ममान्तिकं सत्त्वरमानयैतान् ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूपाज्ञया सौम्यरथोपरिद्रुतं मारोपयच्छेषससीतरामौ ॥
त्वं गच्छ गच्छेत्यवदद्धि रामस्त्वं तिष्ठतिष्ठेति नृपः सुमन्त्रम् ॥१३॥
वाक्यं तयोस्तत्र निशम्य मन्त्री वेगाद्रथं तं किल पर्यणोदयत् ॥
ततश्च तस्मिन् समये नृपस्यद्वारे जनाः शोकयुता बभूवुः ॥१४॥
रामस्ततस्तद्दिवसावसाने ययौ सुतीरांतमसां मलापहाम् ॥
सम्प्राश्य तोयं सहसीतयासौ सुप्तः स सौमित्रि सुमन्त्र सेवितः ॥१५॥
आबालवृद्धा नगराधिवासिनो रामंसमानेतु मतीवयत्नात् ॥
ययुद्रुतं तस्यरथस्य पृष्ठतो रामान्तिके ते मनुजाः प्रसुप्ताः ॥१६॥
रामोब्रवीद्वीक्ष्य जनान्सुमन्त्र महंनयास्यामि पूरीमयोध्याम् ॥
वृथैव दुःखस्य विभागिनो नरा विहाय पौरान् व्रज सौम्य ! सत्त्वरम् ॥१७॥
रामाज्ञया मन्त्रिवरोऽतिहर्षा द्रथे समारोप्य स रामलक्ष्मणौ ॥
सीताञ्चनीत्वा समुपेत्य कोसलं मार्गं पुनः काननमार्गमव्रजत् ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रातः समुत्थाय ततोहि पौरा नालोक्य रामं रथ चक्रमार्गतः ॥
ययुर्द्रुतं ते किल कोसलेस्थिताः प्रतीक्षमाणाः खलु राघवागमम् ॥१६॥

इति श्रीमद्बालबोधरामायणे अयोध्याकाण्डे पञ्चमः सर्गः ॥२॥

जायाऽनुजाभ्यां सहितोहिरामो मध्याह्नकाले प्रजगाम गङ्गाम् ॥
रथात्समुत्तीर्य ततस्त्रयस्ते नेमुर्हि प्रेम्णाऽतिशयेन जान्हवीम् ॥१॥
मत्वाहि रामागमनं महोत्सवं निषादराजः सहबन्धुभिर्ययौ ॥
समर्प्य चोपायनमाशु सम्यक् पपात रामस्य पदारविन्दयोः ॥२॥
रामो निषादं परिगृह्यदोर्भ्यां निधाय तं वक्षसि प्रेमतो द्रुतम् ॥
बुद्ध्वातदीयं कुशलं जगाद स्थानं सखे ? दर्शय वासयोग्यम् ॥३॥
श्रुत्वा निषादः खलु रामभाषितं बद्धाञ्जलिः प्रेमविनम्रकायः ॥
उवाच गेहं कुरु नाथ ? पावनं पदार्पणान्मेऽद्य सुखेन राघव ? ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुक्त्वामयाऽऽनीत सुकन्दमूल मनाथनाथाद्य मयिप्रसीद ॥
श्रुत्वा निषादस्य विभाषितंवचो रामोवभाषे समयोचितां गिरम् ॥५॥
नाहं सखे ! ग्रामगृहे त्विदानीं व्रजामि वर्षाणि चतुर्दशैव ॥
पितुर्निदेशान्नकरोमि भोजनं दत्तंहि चान्येन यतोद्यसौम्य ! ॥६॥
गङ्गातटे सौम्यतरोस्तलेस्थले कुशास्तृतस्थान मुपेत्य शोभनम् ॥
सुष्वाप रात्रौ सहसीतया मुदा रामः सुमन्त्रानुज नाविकैर्वृतः ॥७॥
प्रातःसमुत्थाय समाप्य कृत्यं वटस्यदुग्धेन जटां मनोरमाम् ॥
विधाय रामः समुवाच धीवरं नावं सखे ! सत्त्वरमानयत्त्वम् ॥८॥
रामाज्ञया तत्र गुहः सुनौकां समानयामास दृढां मनोरमाम् ॥
स्नात्वा च पीत्वाऽमृततुल्यमम्भो ययुर्हि ते ततु मघापहांनदीम् ॥९॥
निषादराजः किल राघवाग्रे वद्धाञ्जलिःसन्निदमाह वाक्यम् ॥
प्रक्षाल्य रेणुं तवपादपद्मतः प्रभो ! परंपारमहं नयामि ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवांघ्रिरेणुस्पृशितोप्यहल्या नारीबभूवोपलतः पुरातत् ॥
तरी ममेयं प्रभवेत्सुनारी यतो न काष्ठोपलयोस्तथान्तरम् ॥११॥
अतोद्य रेणुं तवपादपद्मतः प्रक्षाल्यपारं च परं नयामि ॥
नोचेत्तरीयं युवतिर्भवेत्तदा प्रभो ? विलुम्पेन्मम जीविकैतु ॥१२॥
श्रुत्वा निषादस्यवचो हि रामः प्रेमान्वितं भावमतीवगूढम् ॥
विहस्य चोक्तं ममपादयुग्मं प्रक्षाल्य पारं कुरु ते यथारुचि ॥१३॥
निषादराजेन सुकाष्ठपात्रे प्रक्षाल्य पादावतिमोदतो द्रुतम् ॥
जलेन तेनैव कृतं च तर्पणं पीतंजलं तत्स्वकुटुम्बिभिर्मुदा ॥१४॥
सीतां समारोप्य रुरोह रामो हस्तं समाधाय स धीवरस्य ॥
शेषः समारोप्य धनुर्हि नावं प्रसन्नचेताः प्ररुरोह पश्चात् ॥१५॥
रामः सुमन्त्रं प्रविलोक्य साश्रुमेष्यामि धीरोभवमाशुचस्त्वम् ॥

इति श्रीमद्बालबोधरामायणे अयोध्याकाण्डे षष्ठः सर्गः ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निषादराजः समुवाह नावं सबन्धुवर्गः सजवं सुनद्याम् ॥१॥
गङ्गे ? परावर्त्य चतुर्दशाब्दोत्तरं स्वपत्यासह देवरेण ॥
नानोपचारैर्वलिभिश्चमातः ? सम्पूजयिष्याम्यवद द्धरात्मजा ॥२॥
रामः परं पारमवापनद्या निषादमाहूय वचोऽब्रवीदिदम् ॥
सखे ? स्वकार्यस्य सुवेतनं त्वं निगृह्य संयाहि पुरंस्वकीयाम् ॥३॥
श्रुत्वा वचस्तद्रघुनायकस्य निषादराजोऽति मुदाऽब्रवीदिदम् ॥
न तारकस्तारकतोहि मूल्यं गृहणाति धर्मोऽत्र सनातनोऽस्ति ॥४॥
ममापि निस्तारणतोऽपि नाथ ? भवाम्बुधेर्ग्राह्यकरो न यायाः ॥
यतः सरित्सागरयोश्च तारकः प्रभो ? ह्यहं त्वं भवसागरस्य ॥५॥
सदैव सन्तारक ईरितो बुधैस्त्वत्तो न गृहणामि करं ततोऽहम् ॥
रामो निषादस्य निशम्यवाक्यं विहस्य सम्बोध्य च शृङ्गवेरम् ॥६॥
सम्प्रेष्य,, जायाऽनुजसंयुतोऽसौ सद्यो ययौ काननमम्बुजाक्षः ॥

Nepal Sanskrit University, Balmeeki Campus, Kath...

CC-0. In Public Domain. Digitization by eGangotri

रामो मुनेराश्रम मेत्य पावनं शिष्योपशिष्यै रुपगीयमानम् ॥७॥
ननाम सम्यक् स यथोचितंमुनिं सुपूजितः सोऽपि रराजतत्र ॥
उपेत्य पारं खलुजन्हुजाया यावत्स्थितस्तत्र स रामचन्द्रः ॥८॥
तावत्सुमन्त्रः प्रविलोकयन्स्थितः पश्चात्परावृत्य पुरोमयोध्याम् ॥
समागतस्तद्दिवसावसाने रात्र्यां ययौ सद्मनि भूमिपस्य ॥९॥
नत्वोपविष्टश्चरणान्तिकेऽसौ पृष्टस्त्वसौ कोसलभूमिपेन ॥
रामः ससीतः सहलक्ष्मणेन त्यक्तस्त्वया कुत्र वने सुमन्त्र ? ॥१०॥
किमब्रुवन्मा मतिपापिनं तैं जीवाम्यहं नैव तमन्तरेण ॥
विबुध्य सर्वं नृपतिः सुमन्त्राद्विसंज्ञकस्तत्र बभूव. सद्यः ॥११॥
कृच्छ्रादुवाचाथ ममाद्य मृत्युः तुत्रस्यशोकात्मभविष्यति ध्रुवम् ॥
तपस्वि शापो न भवेद्वृथाक्वचित्पश्यन्तु लोका मम कर्मणः फलम् ॥१२॥
हाराम रामेति लपन्नृपोमृतो जगाम नाकं सुरवृन्दवन्दितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नराश्च नार्यो रुरुदुर्भृशं तदा दुःखेन भूपेन सुपालिता ये ॥१३॥
श्रुत्वावसिष्ठोऽपि जगाम तत्र जनान्समास्त्रास्य नृपस्यदेहम्- ॥
तैलस्यभाण्डे प्रणिधायसम्यक् सम्प्रेषयन्नन्दिपुरं स्व दूतम् ॥१४॥
गत्वा स दूतो भरतं जगाद पुरीं स्वकीयां व्रज कोसलाख्याम् ॥
प्रभोऽद्य सद्यः स्वगुरोरनुज्ञया मयैव सार्द्धं कुरु मा विलम्बम् ॥१५॥

इतीश्रीमद्बालबोध रामायणे अयोध्याकाण्डे सप्तमः सर्गः ॥७॥

श्रुत्वा स दूतस्यमुखात् ससम्भ्रमं सहानुजः कोसलमाजगाम- ॥
विलोक्य लोकानतिदुःखकर्शितान् तथोत्सवैर्हीनतीव कोसलम् ॥१॥
ययौ स्वमातुर्भवनं भयान्वितो मातः ? पिता मे क्वगतो वदाशु मे ॥
सा पुत्रतो मातृकुलस्य कौशलं बुद्ध्वाऽब्रवीत्स्वीयसुतं विचक्षणा ॥२॥
हाराम ? रामेति मुहुर्विभाष्य पिता गतस्ते त्रिदिवं मनोरमम् ॥
श्रुत्वावचस्तद्भरतः सशोकं जगाद वाक्यं स पुनः स्वमातरम् ॥३॥

Nepal Sanskrit University, Balmeeki Campus ...

CC-0. In Public Domain. Digitization by eGangotri

मातर्नरामः किमुतत्र संस्थितः पितुः समीपात्कगतः स माम्वद ॥
श्रुत्वावचत्तद् भरतस्य सम्भ्रमङ् मुदान्वितोदन्त मिमंजगाद ॥४॥
रामाभिषेकाय दिनानुवन्धः पित्रा कृतस्तेऽति मुदान्वितेन ॥
कृतो मया दद्विषयेऽति विघ्नो राज्यप्रदानाय तवैव,, तेन ॥५॥
नृपः स्वराज्यं प्रददौ स तुभ्यं रामाय शोकान्ममवाक्यतो वनम् ॥
चतुर्दशाब्दान्स मुनिस्वरूपः सर्वाणि भूषाशयनाम्वराणि ॥६॥
वनेप्रकर्तुं स नृपस्तमादिसद् रामो ययौ लक्ष्मण-जानकीभ्याम् ॥
श्रुत्वाऽतिरौद्रं किलमातृभाषितं विसंज्ञकोऽसौ निपापत भूमौ ॥७॥
अवाप्य संज्ञामवदत्स्वमातरं दुष्टे ? अतोमे व्रज भर्तृघातिनि ? ॥
दयान किं चेतसि ते कुवृत्ते ? रामंवनेप्रेषयितुं कठोरे ? ॥८॥
विसृज्य तां तत्र स सत्वरं ययौ श्रीराममातुर्भवनं भयान्वितः
तां वीक्ष्य पादौ परिगृह्य सद्यो रुरोद दुःखादति मुग्धकण्ठः ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा तं कराभ्यां परिगृह्यचाङ्के निधाय सर्वं समुवाच तत्र ॥
क्रमेण कार्यं किल कैकयीकृतं श्रुत्वाऽतिशोकात्प्ररुरोद सानुजः ॥१०
श्रुत्वा ययौतत्र गुरुर्वसिष्ठो ज्ञानोपदेशाद्भरतं प्रबोधयत् ॥
उद्धृत्य पात्रात्स्वपितुः शरीरं तैलस्य पौरैर्गुरुमन्त्रिभिर्युतः ॥११॥
चितांविधायाशु ददाहदेहं भूपाय सर्वे प्रददुस्तिलाञ्जलिम् ॥
ततः स कैकेयिसुतो नृपस्य चकार कार्यं विधिवत्प्रहृष्टः ॥१२॥
एकादशाहे प्रददौ द्विजेभ्यो धनंनि चोद्दिश्य नृपं बहूनि ॥
पुनर्द्विजान् वेदपरायणान् वहूनभोजयत् स्वस्यपितुर्विमुक्तये ॥१३॥
द्रव्यान्नवस्त्रैः परितोष्य सर्वान् ययौ तमानेतुमितः सपौरः ॥
पुरं समासाद्य स धीवरस्य वासं चकारामल जाह्नवीतटे ॥१४॥
आदय वस्तूनि सुपूजनस्य गत्वा निषादः समपूजयत्तम् ॥
अवेक्ष्य रूपं भरतस्य विह्वलं प्रेमान्वितं शोकसमन्वितञ्च ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनीतवेषो हि गुहस्तमब्रवीद्धन्यः प्रभो ? यस्यच तेऽतिभक्तिः- ॥
ससीतरामे सहलक्ष्मणेन,, ह्यतो न भूमौ मनुजोभवत्समः ॥१३॥

इतीश्रीमद्वालवोधरामायणे अयोध्याकाण्डे अष्टमः सर्गः ॥३॥

श्रुत्वा निषादाद् भरतस्तमब्रवीद् रामं विना भूमितले न सौख्यम् ॥
अतः प्रदास्यामि सुखेन राज्यं रामाय चानीय गृहेऽतियत्नात् ॥१॥
अहंकरिष्यामि पदारविन्दयोस्तस्यैव सेवां सुखतः सुचेतसा ॥
तस्मै वनेवा गुरुमन्त्रिभियुतः समर्पयिष्यामि मुदैव राज्यम् ॥२॥
एवं समाभाष्य सहानुजोऽसौ स्नात्वा च पीत्वा सलिलं सुनिर्मलम् ॥
नौकाः समारुह्य सबन्धुवर्गैः समुत्ततारातिसुखेन जाह्नवीम् ॥३॥
स्थानाच्च तस्मान्मुनिदर्शितेन मार्गेण रामान्तिकमाशु संययौ ॥
जायाऽनुजाभ्यामवलोक्य रामं लोकाभिरामं सुशिलोपविष्टम् ॥४॥
विलोकयन्तं मृगपक्षिसंघं तथा द्रुमैः शोभित काननावनिम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वाऽग्रहोत्केकयिनन्दनस्तत् पदारविन्दं करपङ्कजेन- ॥५॥
उवाच,, मातुर्मम दौर्मनस्यं क्षमस्व दोषं च ममप्रसोद ॥
रामस्ततस्तं परिगृह्य दोर्भ्यां स्वाङ्के समारोप्य सिषेच वाष्पैः ॥६॥
रामोब्रवीत्तात ? वनेकिमर्थं समागतः पौरजनैः समेतः ॥
वाक्यं समाकर्ण्य रघूत्तमस्य प्रोवाच रामं भरतोयथार्थम् ॥७॥
विसृज्य दोषं मम मातुरत्र कुरुष्व राज्यं किल कोसलस्य- ॥
पिता ददौ तेऽनुज ? कोसलस्य राज्यं तथामेऽत्र सुकाननस्य ॥८॥
तदेव कार्यं विधिवत्त्वया मया ऽन्यथा न भद्रं शृणु तात ? सम्भवेत् ॥
वाक्यं समाकर्ण्य रघूत्तमस्य कैकेयिपुत्रो निजगाद रामम् ॥९॥
वालस्य वृद्धस्य तथोद्धतस्य विवेकहीनस्य च कामुकस्य ॥
स्त्रियाजितस्यापि न भाषितं वचो ग्राह्यं बुधैस्तेन प्रसोद राघव ? ॥१०॥
श्रुत्वेति वाक्यं भरतस्य रामो जगाद तथ्यंपरमं पवित्रम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचोद्धतो वा नविवेकहीनो न कामुको नैव स कामिनीजितः ॥११॥
पिता दयालुः प्रददौ स तुभ्यं राज्यं च मह्यं किल काननस्य ॥
अतः प्रजां पालय कोसलस्य भ्रातर्वनस्यास्य निवासिनामहम् ॥१२॥
श्रुत्वेतिवाक्यं रघुनायकस्य प्रोवाच कैकेयि सुतोऽपि रामम् ॥
गृहाणराज्यं नृप ? कोसलस्य नचेत्प्रभो ? यामि यमालयेऽहम् ॥१३॥
गुरुं समालोक्य ततोहि रामः प्रणम्य पादौ कुशलं नृपस्य- ॥
पप्रच्छ भक्त्या मुनिरब्रवीत्तं पिता गतस्ते त्रिदिवं रघूत्तम ? ॥१४॥
निशम्य वाक्यं स्वगुरोर्हि रामः पपात भूमावति शोकतप्तः ॥
रामोब्रवीद्विक्कवितं हि वाक्य मितःपरं मामिह कः प्रपालयेत् ॥१५॥
तथा सुमित्रातनयो ऽथजानकी विज्ञाय चातीव विलेपतुस्तौ ॥
जायाऽनुजाभ्यां सहितः स रामः प्रबोधितः सद्गुरुणावसिष्ठेः ॥१६॥
सर्वे मिलित्वा सलिले सशोकं स्नात्वा ददुर्भूपतये तिलाञ्जलिम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्माय पिण्डं खलु चैङ्गुदं स्वयं स्नात्वा पुनश्चार्द्रं वनाम्बरान्वितः ॥१७॥
नृपाय रामः प्रददौ सुपिण्डं पर्णालयेतेऽति शुचाऽन्विता ययुः ॥
सर्वे दिनान्तेऽथ फलानि भुक्त्वा तस्थुर्नरास्तद्विपिने निशायाम् ॥१८॥
प्रातः पुनः केकयिनन्दनोऽसौ रामेण वार्तां कृतवान् प्रकृष्टाम् ॥
निशम्य रामो भरतस्य वाक्यं दृढं विनामां नगृहं व्रजेदसौ ॥१९॥
विविच्य रामो गुरुमब्रवीद्वचो रहस्त्विमं बोधय मेऽनुजं गुरो ! ॥
ततो वशिष्ठो भरतं निगूढं सर्वं रहस्यं समबोधयद्रहः ॥२०॥
प्रणम्य रामं भरतस्ततोऽब्रवीत् प्रदेहि पादद्वयतः स्वपादुके ॥
संस्थाप्यचेमां तव युग्मपादुकां सिंहासनेऽहं परिपूजयिष्ये ॥२१॥
चतुर्दशाब्दात्परतः पुरंदिनं द्रक्ष्यामिनोचेत्प्रविशामि पावकम् ॥
एवं विनिश्चित्य स भक्तितो द्रुतं प्रणम्य पादौ रघुनायकस्य ॥२२॥
नीत्वाऽथ पादद्वयतः सुपादुके कृत्वाऽतिप्रेम्णा विधिवत्प्रदक्षिणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाययौ पौरजनैश्च मन्त्रिभिः सार्द्धं स सद्यः स्वपुरीमयोध्याम् ॥२३॥

श्रीरामस्य पदारविन्दयुगलं ध्यात्वा सुसिंहासने
सौम्यर्क्षे शुभवासरे शुभतिथौ संस्थाप्य तत्पादुके ॥
सर्वान् पौरजनान् नियुज्य सकले कार्येहि राज्यस्यच
नन्दिग्राममथागमत् स मुनिवत्कृत्वाऽऽकृतिं सानुजः ॥२४॥

इति श्रीमद्बालबोधरामायणे अयोध्याकाण्डे नवमः सर्गः ॥९॥

॥ इत्ययोध्याकाण्डं समाप्तम् ॥

॥*॥ अथारण्यकाण्डम् ॥*॥

त्यक्त्वा राज्यमतीवमोदमनसा कृत्वामुनेराकृतिं
शिक्षार्थं मखहिंसकस्य सततं रामोविशत् काननम् ॥
पूज्यान् प्राप्य यथोचितं मुनिगणानर्चन् य आसीन्मुहु-
र्नत्वा तं प्रकरोमि तस्य विमलं ह्यारण्य कृत्यं स्फुटम् ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदाचिदद्रौ खलु चित्रकूटके सुशीतले सौम्यतरोस्तले स्थले ॥
स्थितः स सीतासहितो विशुद्धदा नासीत्तदा लक्ष्मणसंज्ञकोऽनुजः ॥२॥
शिरः समारोप्य भुवःसुतायाश्चाङ्के प्रसुप्तः खलु रामचन्द्रः ॥
विलोक्य तं जिष्णुसुतो जयन्तो ययौ स काकाकृतितो हि तत्र ॥३॥
ज्ञातुं वलं चेतसि राघवस्य ददार पादौ जनकात्मजायाः ॥
व्रणाद्धि पीत्वा रुधिरं स सद्यो वृक्षस्य शाखोपरि चोपविष्टः ॥४॥
सुप्तोत्थितस्तत्र जगाद रामः श्रीभूसुतायाश्चरणाववलोक्य ॥
कृतं तवेदं वद केन भद्रे ? पादव्रणं तं श्रृणु सम्प्रहर्ष्यहम् ॥५॥
वाक्यं समाकर्ण्य रघूत्तमस्य नोवाच किञ्चिज्जनकात्मजा तम् ॥
रामस्ततो काकमवेक्ष्य तत्र रक्तान्वितं तुण्डमतीवतुष्टम् ॥६॥
आदायचैकं शरमाशुगं स चिक्षेप देवेश सुतोपरि द्रुतम् ॥
शरानुगः स प्रजगाम सद्यः पितुःपदं तं नररक्ष जिष्णुः ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विलोक्य तत् सोऽतिभयेन तस्माद्ययौ महेशस्य पदं च धातुः ॥
गत्वाऽब्रवीत्त्राससमाकुलः सन् त्रायस्व दीनं शरणागतं माम् ॥८॥
शम्भुस्तथा पद्मजनिश्च काकं विलोक्य रामस्य शराभिभूतम् ॥
नरक्षितुं तच्छरतः समर्थौ बभूवतुस्तावपि तं जयन्तम् ॥९॥
संगच्छ तस्यैव पदान्तिकं त्वं भीत्याऽव्रजन्तं समुवाच नारदः ॥
श्रुत्वा वचस्तस्यमुमेर्हि काकः पपात गत्वा सच राघवाङ्घ्रौ ॥१०॥
विलोक्य रामः शरणागतं तं त्राहीति वाक्यं समुदीरयन्तम् ॥
कृपान्वितस्तन्नयनं हि दक्षिणं नीत्वा स प्राणैः परिरक्षितः सः ॥११॥
रामस्तदा तद्विविनं विहाय जायाऽनुजाभ्यां प्रययौ वनान्तरम् ॥
गङ्गातटे पञ्चवटीमुपेत्य चकार वासं विपिनेऽतिहर्षम् ॥१२॥
स्थानं समृद्धं फलपुष्पपत्रै मृगैर्विचित्रैः पशुपक्षि सङ्घैः ॥
कदम्बजम्बू वटपिप्पलाख्यै श्चूतान्वितैः श्रीफलवीजपूरकैः ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृक्षैरनेकै रपरैः सुशाखैः सुशोभितं सम्प्रविलोक्य रामः ॥
श्रीजाह्नवीतः शुभसौम्यभागे तटान्तिके युग्मगृहं चकार ॥१४॥
कृतोनिवासः सुखतश्च तत्र रामेण जायानुजयोर्युतेन ॥
निरीक्ष्य रामं वनवासिनस्तं वासन्तवृक्षाइव रेजिरेच ॥
विलोक्यदेवा दिवितोऽतिहर्षात् समागतास्तद्विपिने ऽब्रवीक्षितुम् ॥
रामं सदारं विमलाम्बुधारां महाप्रभां पञ्चवटीं कुटीञ्च ॥१५॥
विलोकयन्तो ऽतिमुदान्विताः सुराः स्वर्गस्य सौख्यानि लघूनि मेनिरे ॥
स्थिताश्च ते तत्र विधृत्यरूपान् मृगस्य भिल्लस्य खगस्य निर्मलान् ॥१६॥

इति श्रीमद्बालबोधरामायणे अरण्यकाण्डे प्रथमः सर्गः ॥१॥

ततश्च तस्मिन् विपिने ऽतिघोरे रामान्तिकं सूर्पणखा ऽभ्युपागता ॥
रूपेण सा ऽत्यन्तमनोहरेण विहस्य रामं समुवाच निश्चरी ॥१॥
कस्त्वं कुतश्चात्र समागतोसि किमत्र कार्यं वद वारिजाक्ष ? ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामस्तदा तामवदत् क्रमेण भद्रे ? शृणुत्वं मम वासहेतुम् ॥२॥
रामोऽहमेषा दयिता सुमध्यमा सीता बहिस्तिष्ठति मेऽनुजः शुभः ॥
पितुस्त्वयोध्या धिपतेर्हि वाक्यात् समागतश्चात्र वदस्व का त्वम् ॥३॥
वाक्यं समाकर्ण्यं रघूत्तमस्य सुखेन रामं समुवाच सर्वम् ॥
वृत्तान्तमत्यन्तमनोहरेण वाक्येन कामातुरतां गता सा ॥४॥
त्वदीयमेवात्र विलोक्य रूपं समागताऽहं मयि संरमस्व ॥
वासोहि मेऽस्मिन्विपिने ऽनुजाऽहं दशाननस्यासुर नायकस्य ॥५॥
भार्याममैषा प्रियवादिनीयं प्रपश्य संगच्छ ममानुजस्थाति ॥
ममैकपत्नीव्रतमस्ति तेन सएव योग्यस्तव सौम्यदर्शने ? ॥६॥
रामात्समाश्रुत्य ययौ द्रुतं सा शेषान्तिकं कामविमोहिता ऽब्रवीत् ॥
त्वदीयबन्धोर्वचनं निगृह्य समागताऽहं मयि संरमस्व ॥७॥
कामातुरां तां प्रसमीक्ष्य लक्ष्मणो जगाद वाक्यं प्रविहस्य निश्चरीम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दासोऽस्मि रामस्य शुभाननेऽहं दासीत्वभावं त्वमपीह यास्यसि ॥८॥
अतो भजत्वं रघुनायकं शुभे ? स एवराजा ऽखिललोकनायकः ॥
श्रुत्वावचस्तस्य रुषान्वितायया रामान्तिकं तं सम्रुवाच मां कथम् ॥९॥
सं भ्रामयस्याशु तवाग्रतोऽहं विभक्षयिष्यामि शुभाननामिमाम् ॥
व्यादाय वक्त्रं खलु भक्षणाय दुद्राव सीताम्प्रति साऽतिरोषात् ॥१०॥
चिच्छेद तस्याः श्रुतिनासिकं वै रामाज्ञया खङ्गत एव लक्ष्मणः ॥
कृत्वाऽर्तनादं प्रययौ खरान्तिकं रुरोद सा साश्रुमुखी तदग्रे ॥११॥
दृष्ट्वा खरस्ता मिदमाह भद्रे ? कृताविरूपा वदकेन साम्प्रतम् ॥
करोम्यहं तस्य समूलघातं श्रुत्वाऽब्रवीद्वाक्यमिदं निशाचरी ॥१२॥
भ्रातस्त्वयोध्याधिपतेस्तनूजो जायाऽनुजाभ्यां सहितो हि रामः ॥
पितुर्निदेशादिह पञ्चवट्यां समागतस्तेन कृता दशेयम् ॥१३॥
खरस्तदीयं वचनं निशम्य रुषान्वितः सैन्ययुतो जगाम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सीतान्तिकं स्थाप्य स लक्ष्मणं प्रियं रामोपि योद्धुं प्रययौ निशाचरैः ॥१४॥
बभूवयुद्धं तुमुलं सशब्दं भयानकं राघवराक्षसानाम् ॥
रामः स्वबाणैर्निशितैः प्रसंगरे निहत्य सर्वान् पुनराजगाम ॥१५॥
पत्युः शरीरं प्रसमीक्ष्य सीता व्रणान्वितं स्वस्य करद्वयेन ॥
ममार्ज चानीय जलं सुपात्रात् पर्णालये तेऽतिसुखेन रेजिरे ॥१६॥
निशाचरी सा समवीक्ष्य मृत्युं निशाचराणाममितौजसां तत् ॥
ययौ रुदन्ती रुधिरान्विताम्बरैर्निशाचराणामधिपस्य सन्निधौ ॥१७॥

इति श्रीमद्बालबोधरामायणे अरण्यकाण्डे द्वितीयः सर्गः ॥२॥

विलोक्य रूपंविकृतं स तस्याः प्रोवाच वाक्यं रजनीचराधिपः ॥
कृताविरूपा वद केन सत्यं करोम्यहं तस्य समूलघातम् ॥१॥
इन्द्रान्तकौ पाशिधनाधिपौवा देवासुरौवाधरणीधरौवा ॥
त्यन्नासिकाकर्णं विनाशकारिणस्त्रातुं न शक्ता युधिमच्छरेण ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशम्य वाक्यं दशकन्धरस्य निशाचरीसा समुवाच सोदरम् ॥
भ्रातस्त्वयोध्याधिपतेः सुतः शुभो रामो हि जायाऽनुजयोः समेतः ॥३॥
स्थितः स सम्यक् शुभपञ्चवट्यां रूपाणि तेषां किल मानुषाद्बहिः ॥
भ्रातस्त्विदानीं सदने तवाहं विलोक्य रत्नानि च रत्नरूपाम् ॥४॥
सीतां समानेतुमितो गताऽहं रामान्तिकं संशृणु मेऽग्रज ! त्वम् ॥
विरूपता तेन कृता जनस्थले रामानुजेनाति प्रियम्वदेन ॥५॥
दृष्ट्वा दशा मे सहबन्धुभिर्यथौ खरादयस्तेऽपि हताः प्रसंगरे ॥
अतस्तु गत्वा स्वयमेव तत्र चन्द्राननां तां गृहरत्नरूपाम् ॥६॥
सीतां समानेतु मतोयतस्त्र छलेन वा बाहुबलेन हेऽग्रज ! ॥
प्रपञ्चतस्त्वं कुरु रामलक्ष्मणौ दूरं ततस्तस्य शुभाश्रमादिह ॥७॥
नेतुं क्षमस्त्वं बहुभिर्विविच्य कुरुष्व सीताऽधिगमे प्रयत्नम् ॥
श्रुत्वा वचस्तां परिबोध्य तत्र दशाननः स्वीयगृहंजगाम ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचारितं तेन सुचेतसा तदा विना हरिं केन हतः खरासुरः ॥
ततो न रामोमनुजः स विष्णुर्वधाय मे मानुषताम्प्रयातः ॥९॥
नूनं विधेर्वाक्यत एव साम्प्रतं जातो हरिर्भानुले न शंसयः ॥
चेन्मानवस्तस्य विहृत्य भार्यां युद्धे हनिष्यामि च तं रिपुं क्षणात् ॥१०॥
नचेद्धरिस्तस्य करेण मृत्युं सम्प्राप्य यास्यामि हरेः परम्पदम् ॥
अतोहि तं यामि विरोध बुद्ध्या द्रुतं न भक्त्या भगवान्प्रसीदति ॥११॥
विमृश्य चान्तः करणे दशास्यो मारीचगेहं प्रजगाम सद्यः ॥
दृष्ट्वा नृपं स्वस्य गृहे समागतं चिन्तान्वितं तं परिपूज्य सत्वरम् ॥१२॥
क्षेमञ्च बुद्ध्वा ऽऽगमनस्य कारणं पप्रच्छ भक्त्या भयतोऽति भूपम् ॥
प्रभोऽद्य यानं प्रविहाय मद्गृहे समागतः किं वद चिन्तयान्वितः ॥१३॥
करोमि कार्यं निखिलं हितायते विगर्हितञ्चापि न तत्र शंसयः ॥
श्रुत्वेतिवाक्यं परिहृष्टचेतसा दशाननस्तं समुवाच सर्वम् ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मारीच ? रामेण विनाऽपराधं प्रधर्षिता मे भगिनी वनान्ते ॥
अतः सहायेन तवैव वत्स ? नेष्यामि भार्यां सुलभेन तस्य ॥१५॥
भूत्वामृगश्चाति मनोहरस्त्वं कुरुष्वतां वाश्रमतोऽति दूरम् ॥
दशाननाद्वाक्य मतीव भीमं श्रुत्वाऽब्रवीत्स्वरस्य स पूर्ववार्ताम् ॥१६॥
ततस्त्वरं तेन कुरुष्व मैत्रीं निशाचराणां परिरक्षणाय ॥
हितं न ते संश्रृणु चान्यथा प्रभो ? प्रभुर्हि लोकत्रितयस्य रामः ॥१७॥
मारीचतस्तद्वचनं निशम्य जगाद कोपाच्छृणु राक्षसाधम ? ॥
व्रजस्व नोचेदसिना निहत्य कार्यं करिष्यामि मनोनुरूपम् ॥१८॥
मृत्युं विमृश्योभयतः स तत्र हरिं जगमाशु निशाचरो द्रुतम् ॥
रामोऽपि सीतामवदत्त्वमग्नौ सन्तिष्ठ वर्षं हि निशाचराणाम् ॥१९॥
कृत्वा विनाशं पुनरग्नितस्त्वा मुद्धृत्य यास्यामि पितुः पुरं प्रिये ? ॥
निशम्य सीता स्वपतेः सुवाक्यं विवेश वह्नौ प्रणिपत्य रामम् ॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मायाकृतिं तत्र विधाय तादृक् तस्थौ सती सा ऽमलपर्णगेहे ॥
ज्ञातं न चैतत्खलु लक्ष्मणेन कृतं यदेतत् रघुनायकेन ॥२१॥
सुखाय लोकत्रितयस्य . सद्यो विनाशहेतोर्भुवि राक्षसानाम् ॥
रामाश्रमस्यान्तिक मेत्य सोऽसुरो मृगस्य रूपं समधारयद्द्भुतम् ॥२२॥
ग्रीवा मणेर्यस्य च रौप्यविन्दवः स्वर्णस्य गात्राणि सुशोभनानि ॥
मायामृगं वीक्ष्य विकल्पिता सा सीता पतिम्प्राह पते ? प्रपश्य ॥२३॥
विचित्र रूपं नयनाभिरामं मनो विनोदाय प्रदेहि मे मृगंम् ॥
रामः समाकर्ण्य वचः प्रियायाः प्ररक्ष सीतां समुवाच लक्ष्मणम् ॥२४॥
मृगं समानेतु मितोऽधुनाऽहं यास्यामि हेतो जंनकात्मजायाः ॥
चरन्त्यरण्ये खलु दुष्टजन्तवस्ततः प्रयत्नेन प्ररक्ष जानकीम् ॥२५॥
वाक्यं समाकर्ण्य रघूत्तमस्य विविच्य वाक्यं तमुवाच लक्ष्मणः ॥
नायंमृगो राघव ? निश्चरो ऽयं मृगोहिनैवं भवतीहलोके ॥२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशम्य तत् सम्प्रविहस्य रामः सम्प्राह जानन्नपि लक्ष्मणम्प्रति ॥
चेन्निश्चरोऽयं विनिहन्मिनून मुक्त्वेतिवाक्यं प्रययौ मृगम्प्रति ॥२७॥

इतीश्रीमद्बालबोधरामायणे अरण्यकाण्डे तृतीयः सर्गः ॥३॥

रामं समालोक्य स प्राद्रवत्ततो मायामृगोऽत्यन्त भयेन तस्मात् ॥
विलोकयन् राममुखारविन्दं प्रावर्तयित्वा वदनं मुहुर्मुहुः ॥१॥
दूरं समीपं हि प्रधावमानं मृगं समालोक्य सुशोच रामः ॥
नायंमृगो निश्चर मेवबुद्ध्वा रामः शरैकेन जघान निश्चरम् ॥२॥
सोच्चःस्वराल्लक्ष्मण ? पाहि शंकटा दाभाष्य रामेतिच चेतसा मृतः ॥
वाक्यं समाकर्ण्य निशाचरस्य मारीचसंज्ञस्य भयानकं तत् ॥३॥
रामानुजं प्राह भयेन सीता वाक्यं न किं तत् प्रश्रृणोषि वत्स ? ॥
भ्राताऽद्यते ऽस्मिन् विपिने प्रपीड़ितस्ततो द्रुतं गच्छ सहाय हेतोः ॥४॥
वाक्यं समाकर्ण्य स भूसुतायाः जगाद नैतद्रघुनायकस्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्यं शुभे ? संशृणु मे ऽधुनेदं शुचिस्मिते ? सौम्यमना भवत्वम् ॥५॥
रामः कथं सम्प्रवदेद्धि दीनवत् भ्रूभंगतो नश्यति यस्य विश्वम् ॥
श्रुत्वेतिवाक्यं पुनरब्रवीत्सा भ्रातुर्विनाशं त्वमपीह वाञ्छसे ॥६॥
प्रपश्य भार्याहरणोद्यतस्त्वं रामस्य,, चाहं निधनं व्रजामि ॥
पिधाय कर्णौ करतोहि लक्ष्मणः श्रुत्वेति सीतामिदमाह कोपात् ॥७॥
व्रजाम्यहं मार्गयितुं स्वबन्धुं रामं त्वया चाद्य विपत् प्रलभ्यते ॥
एवं समाभाष्य समर्प्य सीतां वनस्यदेव्यै प्रययौ स लक्ष्मणः ॥८॥
ततोहि रामाश्रममेत्य रावणो मुनेः स्वरूपात् स्वयमेव सत्वरम् ॥
भिक्षां ययाचे स्वकरात्स तत्र वाक्येन चातीव मनोहरेण ॥९॥
दृष्ट्वा स्वरूपं किल सद्दषेः समं नत्वाऽब्रवीद्वाक्य मतीव भक्त्या ॥
क्षणम्प्रतिष्ठात्र मुने ? ममाश्रमे भार्ताऽत्र यावन्मम चागमिष्यति ॥१०॥
वाक्यं समाकर्ण्य स भूसुतायाः सम्प्राह भिक्षुर्वचनं सुसौम्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भर्ताऽत्र ते भामिनि ? कोवदस्व वने किमर्थं समुपागतोसि ॥११॥
सर्वं समाख्याहि शुभे ? स्ववृत्तं निशम्यतत्त्वं समुवाच सीता ॥
क्रमेण सर्वं किल काननागमो रामस्य,, राज्यं भरताय दत्तम् ॥१२॥
श्रुत्वा दशास्यः प्रविहाय रूपं मुनेस्ततो देहमधारयत् स्वकम् ॥
विलोक्य भूतानि वितत्रसुस्तं भीत्याहि देवी प्रगता वनस्य ॥१३॥
विदार्य भूमिं नखतः स तत्र शन्तोलयित्वा सह सीतयाऽऽशु ॥
कृत्वा रथे तां गगनान्निशाचरो भयाद्ययौ वेगत एव सत्वरम् ॥१४॥
सीता भयोद्विग्नमना मनस्विनी हाराम रामेति विलप्यमाना ॥
विलोकयन्ती भुवमेव साऽबला ययौदशास्येन विनीयमाना ॥१५॥
मार्गे जटायुः कृतवान्हि युद्धं दशास्यतो चञ्चु नखेन दारुणम् ॥
रथं विभज्याशु विमोच्य जानकीं दशाननं प्राह खगोऽतिरोषात् ॥१६॥
रेदुष्ट ? रामस्य प्रियां पतिव्रतां नीत्वाऽग्रतोमे क्वगमिष्यसि त्वम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वा दशास्यः खलु तस्य पक्षौ छित्वा च नीत्वा जनकात्मजां ययौ ॥१७॥
हाराम रामेति विलप्यमाना सीता पुनर्वीक्ष्य गिरौ प्लवंगमान् ॥
उद्धृत्य सर्वाणि विभूषणानि वस्त्रार्धखण्डे प्रपपात तद्गिरौ ॥१८॥
एवं स सिन्धुं प्रततार तूर्णं लङ्कां स्वकीयां समुपागतोऽसुरः ॥
तदन्तरेऽशोकवनस्य मध्ये सीतां समारोप्य सुयत्नतस्ततः ॥१९॥
निधाय रक्षाय निशाचरीस्ततः प्रहृष्टचेताः स्वगृहे प्रविष्टः ॥
पत्युः पदाब्जं जनकात्मजा सा निधाय प्रेम्णाऽतिशयेन चित्ते ॥२०॥
अशोकमूले हरिणीवदुःखं व्याधाश्रिता रामप्रिया चकार ॥
अहर्निशं सा चकिता भयेन सीतास्थिता राक्षसवृन्दमध्ये ॥२१॥

इती श्रीमद्बालबोध रामायणे अरण्यकाण्डे चतुर्थः सर्गः ॥४॥

रामो वने वीक्ष्य मुखारविन्दमतीवशुष्कं खलु लक्ष्मणस्य ॥
उवाच तातात्र कथं समागतस्त्यक्त्वाऽतिघोरे विपिने शुभाननाम् ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रणम्य रामं किल लक्ष्मणोऽब्रवीद् बद्धाञ्जलिर्भूय विनम्रकायः ॥
निशाचरोक्तं वचनं निशम्य सा यदब्रवीत्तन्न मयाऽत्र वाच्यम् ॥२॥
ततः शुभां तां विपिने विसृज्य समागतस्त्वां परिमार्गितुं प्रभो ? ॥
वाक्यं समाकर्ण्य स लक्ष्मणस्य रामस्तदानीं समुवाच सोदरम् ॥३॥
कृतंत्वयाऽत्यन्त विगर्हितं यतस्तयोदितं सत्यममानयोर्वने ॥
सीताऽपनीता खलु राक्षसेन वनालयात् सत्यमवेहि लक्ष्मण ? ॥४॥
ततश्च तावेत्य परम्पवित्रं स्वमाश्रमं पञ्चवटीं रघूत्तमौ ॥
सीतामनालोक्य रघूत्तमौद्वौ विलेपतुः प्राकृतमानवाविव ॥५॥
रामोद्रुमान् पुष्पलताविहंगमान् पप्रच्छ जाया मम जानकी शुभा ॥
नीताऽऽश्रमात्केन वदन्तु सर्वे कृत्वाऽनुकम्पां मयि राघवोपरि ॥६॥
एवं विचिन्वन् स ययौ हि तत्र जटायुरासीद्भुवि यत्र मूर्च्छितः ॥
विबुध्य सर्वं खगतोहि रामो दत्वा दिवं तस्य ययौ वनान्तरम् ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्गेऽथ तस्मिन् विपिनेऽतिघोरे निशाचरान् वीर्ययुतान् विनिघ्नन् ॥
यशौ शबर्याः सदनान्तिकं तदा दृष्ट्वाहरिं सा शबरी प्रधावति ॥८॥
रामं समानीय निजाश्रमं सा सहानुजं तं समपूजयन्मुदा ॥
पञ्चोपचारैः स्तुतिवाक्यपूरितै रभोजयत्स्वादुमयं फलंच ॥९॥
कृत्वा स्तुतिं सा प्रणिपत्य पादौ तमब्रवीत् सम्व्रज पर्वतोत्तमम् ॥
भ्रातुर्भयात्तिष्ठति वानरः प्रभो ? सुग्रीवसंज्ञः सचिवैः समेतः ॥१०॥
कुरुष्व मैत्रीं कपिना हि तेन तेनैव कार्यं तव सम्भविष्यति ॥
उक्त्वा विवेशाथ हुताशने सा दिवंगता रामप्रसादतोमुदा ॥११॥

इती श्रीमद्बालबोधरामायणे अरण्यकाण्डे पञ्चमः सर्गः ॥५॥

॥ इत्यरण्यकाण्डं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥*॥ अथ किष्किन्धा काण्डम् ॥*॥

श्रीरामं रजनीचराकर वनध्वंशप्रचण्डालं
कीर्तिर्यस्य मनोरमा सुविमला मध्येजगद् राजते ॥
ध्यात्वातस्य पदद्वयं सुविमलं कञ्जाधिकं चेतसा
वक्ष्येहं कपिराम सख्यजनितां पापापहां सत्कथाम् ॥१॥
श्रीरामो ऽनुजसंयुतश्च शवरीवाक्याद्ययौ सत्वरं
नानापद्म परागवासितजलं पम्पाभिधं सत्सरः ॥
पीत्वा तस्य जलं पथिश्रमहरं विश्रम्य तौ राघवौ
गच्छन्तौ प्रविलोक्य वायुतनयं भीत्या ऽब्रवीद्वानरः ॥२॥
पश्यैतौ नरभूषणौ मुनिवरौ चापान्वितौ साम्प्रतं
किम्मां घातयितुं विसृश्य रिपुणाभ्रात्राऽत्रसम्प्रेषितौ ॥
गत्वा त्वं वटुरूपतोहि हृदये ज्ञात्वा तयोराव्रज ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेत्तौदुष्टधियौ सखेऽत्र गिरितो यास्याम्यहं सत्वरम् ॥३॥
ततो हनूमान् द्विजबालकस्य रूपाद्ययौ राघवयोः समीपम् ॥
पप्रच्छ गत्वा किमिहागतोसि प्रभोब्जपादादिह घोरकानने ॥४॥
कस्त्वं कुतश्चात्र वने समागतः किमत्रकार्यं वद वारिजाक्ष ? ॥
गिरेर्गुहायास्तिमिरं निहत्य वपुः प्रकान्त्या भ्रमसे कथं त्वम् ॥५॥
नीचोच्चभूमा वतिकोमलेन पदेन गच्छन्त मतीवकष्टात् ॥
विदीर्यते मे हृदयं विलोक्य प्रभो ? भवान् किं परमेश्वरोऽस्ति ॥६॥
निशम्य वाक्यं द्विजबालकस्य विहस्य रामः समुवाच सोदरम् ॥
अनेन सौम्यद्विजबालकेन शब्दंसुशास्त्रं बहुधाविलोकितम् ॥७॥
यतोऽस्यभावं बहुभावगर्वितं सुचिन्तितं कर्णसुखम्प्रजायते ॥
रामः स्ववृत्तान्त मशेषमादितो द्विजात्मजं तं समुवाच सद्यः ॥८॥
ज्ञात्वा च तेनाप्यखिलं सुवृत्तं द्विजात्मजं प्राह रघूत्तमस्तदा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टाप्रिया मे विपिने श्रुतावा वार्ता तदीयेति वदस्व मामिह ॥९॥
श्रुत्वाऽब्रवीद्वाक्य मतीवभक्त्या द्विजस्यपुत्रो रघुनन्दनम्प्रति ॥
सुग्रीवतस्त्वं कुरु नाथ ! मैत्रीं सएव कार्यं तव साधयिष्यति ॥१०॥
रामस्तदाकर्ण्यं द्विजस्यपुत्राद्विविच्य वाक्यं समुवाच वालम् ॥
नयस्व मां तत्र कपेःसमीपं सुग्रीवतोऽहं प्रकरोमि मैत्रीम् ॥११॥
वाक्यं समाकर्ण्य स राघवस्य दधाररूपं पवनात्मजः स्वयम् ॥
निधाय कन्धोपरि राघवौ द्वौ ययौद्रुतं तस्य नगस्य मूर्धनि ॥१२॥
संस्थाप्य वृक्षस्यतले स राघवौ सुग्रीवमासाद्य तमब्रवीदिदम् ॥
विहाय भीतिं कुरु तेन मैत्रीं रामेण सार्द्धं तव योजयामि ॥१३॥
श्रुत्वा वचस्तस्य स वानरेन्द्रो ययौ द्रुतं राघवयोः समीपम् ॥
समारुतिस्तस्य चकार पूजनं रामस्य सौमित्रि युतस्य सादरम् ॥१४॥
हरिर्हनूमानतिहर्षतः शुभा मकारयद् प्रेक्षक वह्नि मैत्रीम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तयो,, स्ततस्तावपि चैकमानसौ बभूवतुः प्रेमयुतौ परस्परम् ॥१५॥
रामस्यवृत्तान्त मशेषमादितो विबुद्धय रामानुजतः स वानरः ॥
कृताप्रतिज्ञा शृणु तेऽरिसंघं रणेहनिष्यामि सखे ? न संशयः ॥१६॥
कदाचिदत्रैव नगस्य मूर्धनि स्थितोह्यहं मन्त्रिभिरन्वितस्तदा ॥
दृष्टा मया व्योमपथाद्रथेन गताऽबला राक्षस नीयमाना ॥१७॥
दृष्ट्वा तयाऽस्मान् परिवध्य भूषणं वस्त्रार्धखण्डेन निपातितं गिरौ ॥
उक्त्वेतिवाक्यं प्रददौ स तस्मैरामाय सर्वाणि विभूषणानि ॥१८॥

इति श्रीमद्बालबोधरामायणे किष्किन्धा काण्डे प्रथमः सर्गः ॥१॥

विमुच्यवस्त्रं प्रविलोक्य सर्वं रामोऽब्रवीद् बन्धुमवेक्ष्य तत्र ॥
प्रपश्य तताद्य विदेहजायाः सर्वाणि सौम्यानि विभूषणानि ॥१॥
तस्यान वेतिप्रकुरुष्व निश्चयं श्रुत्वेतिवाक्यं समुवाच लक्ष्मणः ॥
जानामि नाहं श्रुणु कुण्डलद्वयं तथान जाने करकङ्कणेच ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादप्रणामान्ननु नित्यमेव जानामि तस्याः खलु नूपुरेद्वे ॥
श्रुत्वावचस्तस्य विभूषणानि निधाय प्रेम्णा ददृशोचतेऽसौ ॥३॥
हाहा प्रिये ? माम्प्रविहाय कानने कुतोगतात्वं नयनाभिरामे ? ॥
विलोक्य रामं सशुचं तदाऽऽह वाक्यं सुमित्रातनयः सुयुक्तम् ॥४॥
प्रभो ? सहायेन कपीश्वरस्य सम्प्राप्स्यते सत्वरमेव जानकी ॥
श्रुत्वा तदा राघवयोर्विभाषितं शोकान्वितस्तत्र हरिप्रवीरः ॥५॥
उवाच रामं नकुरुष्व शोक मतःपरं श्रीजनकात्मजायाः ॥
हत्वारणे रावणमाशु जानकीं दास्यामिते सत्यमवेहि राघव ? ॥६॥
सुग्रीवकस्यापि विबुध्यदुःखं रामोपिदुःखादिदमाह वानरम् ॥
सखे ? शरैकेन निहत्य वालिनं दास्यामि ते वानरराजधानीम् ॥७॥
रामात्समाश्रुत्य स वानरेन्द्रो विविच्य वाक्यं समुवाच रामम् ॥
प्रभो ? वलीनां प्रवली स वाली कथं शरैकेन हनिष्यते त्वया ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्वापरीक्षां बहुशः स तस्य ततोऽभवद्वालिवधे विनिश्चयः ॥
रामस्य कार्यं प्रविलोक्य सर्वं ममानुषं रूपमनूपमश्च ॥९॥
चित्ते कपीशस्य स राम ईश्वरो नैवंमनुष्यः प्रकरोति कार्यम् ॥
अतोऽतिप्रेम्ण्या प्रणिपत्य राम मुवाच भक्त्याऽतिशयेन तत्र ॥१०॥
प्रभो ! हिमेनारिजयस्यवाञ्छा तथान राज्यस्य कलत्रपुत्रयोः ॥
त्वत्पादपद्मस्य सुसेवनं मे करोतुचेतः खलु जन्म जन्मनि ॥११॥
श्रुत्वा कपीन्द्रस्य वचस्तदेदमुवाच रामः प्रविहस्य मित्रम् ॥
किमां वदिष्यन्ति सखेऽत्रलोकाः कृत्वासुसख्यं रघुनन्दनेन ॥१२॥
अभूनकिञ्चित् कपिनायकस्य तेनैव युद्धाय सखे ! व्रजाशु ॥
नूनं हनिष्यामि तवापकारिणं सखेः न शंकांकुरु मानसे किमु ॥१३॥
श्रुत्वा वचस्तद्रघुनन्दनस्य ययौ प्रयोद्धुं खलु वालिनाद्रुतम् ॥
कृत्वाऽतिनादं समुपाह्वयत्तं निशम्य वाली सरुषा प्रधावति ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बभूवयुद्धं तुमुलं तयोस्तदा परस्परं घोरतरं हि तत्र ॥
परं नरामः प्रमुमोच बाणं दृष्ट्वैकरूपं प्रियघात शंकया ॥१५॥
ततः स वाली दृढमुष्टिनाऽहनत् सुग्रीवदेहे ऽतिरुषामहावली ॥
असृक् वमन् रामसमीपमेत्य रामं भयादाह स कम्पिताङ्गः ॥१६॥
हेराम ! चेन्मद्धननेऽस्ति वाञ्छा निहन्यतां स्वस्यकरेण सद्यः ॥
कथंहि मां घातयसेऽतिशत्रुणा मद्भ्रातृणा पापकृदात्मना त्वम् ॥१७॥
निशम्य रामः कपिनायकस्य वाक्यं स्वमित्रस्य शुचान्वितस्य ॥
स्नेहादिदम्प्राह सखे ? शृणु त्वं दधस्व धैर्यं प्रविहाय चिन्ताम् ॥१८॥
दृष्ट्वैकरूपं तववालिनश्च क्षिप्तं न बाणं खलु तस्य मृत्यवे ॥
अतः पुनर्गच्छ तमेव योद्धुं सत्यं स्वबाणेन निहन्म्यहन्तम् ॥१९॥
सौमित्र ! सम्प्रेषय सत्वरं पुनर्बद्ध्वा स्रजं भ्रान्तिनिवारणाय ॥
श्रुत्वा वचस्तत् रघुनायकस्य बद्ध्वागले सौम्यस्रजं स लक्ष्मणः ॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्रेषयत्तं समराय पृष्ठतः स्वयञ्च रामः समराजिरे ययौ ॥

इति श्रीमद्बालबोधरामायणे किष्किन्धाकाण्डे द्वितीयः सर्गः ॥२॥

गत्वा पुनस्तत्र समाह्वयत्तं श्रुत्वा स वाली वहुरोषतस्तदा ॥१॥
सम्प्रस्थितस्तत्र भयेन तारा निगृह्य पत्युश्चरणौ जगाद ॥
वनेऽङ्गदो यच्छ्रुतवान् वचस्तच्छ्रुत्वाऽत्र कार्यंकुरु सम्विविच्य ॥२॥
रामेणसार्द्धं कृतवान् स सख्यं तेनाद्ययुद्धाय पुनः समागतः ॥
कृता प्रतिज्ञा शृणु राघवेन बधाय ते तेन न गच्छयोद्धुम् ॥३॥
नचेत्कथं भग्नतनुस्तवानुजो योद्धुं त्वयैवाद्य पुनः समागतः ॥
श्रुत्वावचस्तत्र स वानरः प्रियामुवाच तां युक्तितरं सुवाक्यम् ॥४॥
प्रिये ! न तस्यास्ति जगत्त्रये क्वचित् शत्रुस्ततः सत्यमवेहि भामिनी ! ॥
यद्यागतः सम्प्रति शोभने ? गिरौ वनेऽथवा तं शिरसा प्रणम्यच ॥५॥
गृहे समानीय पुनः प्रपूजनं करोम्यहं तस्य विधानतो ऽन्यथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निहत्य सद्यः समरे सहोदरं समागमिष्यामि पुनर्गतायुषम् ॥६॥
एवं समाभाष्य सतीं पतिव्रतां सुग्रीवतश्चाशु ययौ प्रयोद्धुं ॥
परस्परं पूर्ववदेव युद्ध मभूत्तयोर्लोमविहर्षणं पुनः ॥७॥
सुग्रीवमाकृष्य करेण वाली मुष्टिप्रहारं प्रचकार देहे ॥
तथैव चाकृष्य बलाच्च वालिन मताड़यत्सोऽपि रुषान्वितस्तम् ॥८॥
रामोऽथ वृक्षप्रणिलीयमानः चिक्षेपबाणं खलुतस्य मृत्यवे ॥
शराभिघातात्स पपात भूमौ विसंज्ञकस्तत्र रणाजिरेऽभवत् ॥९॥
अवाप्य संज्ञा मवदत् स रामं कृतोमया नैव तवापराधः ॥
त्वयाहतोऽहं वद केन राम ? भक्ष्यं न मांसं खलु वानरस्य ॥१०॥
भूत्वाऽन्वयेह्यत्र मनोर्हि राम ? कृर्तहि युद्धं किमु चोरवद्रणे ॥
सुग्रीवतस्ते किमभूद्धितञ्च मत्तो ऽहितम्वा किमभूद्वदस्व ॥११॥
हृताऽबला तेऽत्र दशाननेन सुग्रीवतस्तेन कृताऽद्य मैत्री ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेराम ? सत्वं मम लोकविश्रुतं श्रुतं वने किंन प्रकामिनात्वया ॥१२॥
श्रुत्वेतिवाक्यं हरिराजकस्य रामोवदद्वाक्य मिदं सुयुक्तम् ॥
धर्मस्यरक्षार्थं मिहागतं मां बुद्ध्वाऽऽश्रितं वै निजसोदरं त्वया ॥१३॥
गृहात्समागत्य कृतंहि युद्ध मुल्लंघ्य वाक्यं शुभदं प्रियायाः ॥
तथाऽनुजस्यास्य विहृत्यभार्यां संस्थाप्य गेहे रमसे तया त्वम् ॥१४॥
पापेन तेनैव मयाहतोऽद्य विविच्य वाक्यं वद मर्कटाधम ? ॥
श्रुत्वावचस्तद्रघुनायकस्य विज्ञाय रामं परमेश्वरन्तदा ॥१५॥
ध्यात्वा च नत्वा चरणौहितस्य भयादिदम्प्राह शृणुष्व राघव ? ॥
क्षमस्व दोषं मम नाथ ? सर्वं ददस्व मे सत्यपुरं स्वकीयम् ॥१६॥
निगृह्यपुत्रं ममचाङ्गदं प्रभो ? बलेनतुल्यं मम तम्प्रविद्धि ॥
एवं समाभाष्य स राघवाग्रे देहंजहौ तत्र हरिप्रवीरः ॥१७॥
ध्यात्वा राममतीव मोदमनसा वाली तमग्रेस्थितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्यामं नीलनवीन नीरदसमं पापापहं पुण्यदम् ॥
विभ्राणं शुभवल्कलं निजतनौ सौमित्रिणा सेवितं
पश्यन् रामशराभिघात रुजतः स्वर्गं ययौ वानरः ॥१८॥

इति श्रीमद्बालबोधरामायणे किष्किन्धाकाण्डे तृतीयः सर्गः ॥३॥

तारा स्वपत्युर्मरणं निशम्य ययावरं तस्य कलेवरान्तिकम् ॥
रुरोद दृष्ट्वा पतितं मृतं तं पत्युः शरीरं समुवाच रामम् ॥१॥
हेराम ! माञ्चापि निहत्य वाणतः पत्युःसमीपं परि प्रेषयस्व ॥
सुखं न स्वर्गेऽपि भवेद्धि तस्य विहाय मां तेन निहन्तु मामपि ॥२॥
दुःखं हि सर्वं विपिनेऽनुभूतं पत्नीवियोगाज्जनितं त्वयाऽपि ॥ गा/
अतः स्वपत्युर्निकटं नयस्व माञ्चापि हत्वा प्रभवेन्महत्फलम् ॥३॥
रामोऽथ तारां परिवोध्य सम्यक् समादिदेशाशु कपिं सखायम् ॥
सखे ! स्ववन्धोः क्रियतांहि कार्यं पुत्रेणसार्द्धं शृणु पारलौकिकम् ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वावचस्तत् रघुनायकस्य रथेसमारोप्य स वालिनं द्रुतम् ॥
राजोपरैरखिलैः सवानरैः सवालिसूनु र्निजमन्त्रिवर्गैः ॥५॥
ययौ प्रकर्तुं विधिवत् सहैव शरीरदाहस्य यथोक्तवत् क्रियाम् ॥
दग्ध्वा च देहं प्लवगेश्वरस्य तस्मैददुस्ते प्लवगास्तिलाञ्जलिम् ॥६॥
गृहेसमागत्य च तस्यकार्यं चकार शास्त्रोक्तविधानतोऽङ्गदः ॥
ततः समागत्य स वानरेन्द्रः सुग्रीवसंज्ञः समुवाच रामम् ॥७॥
प्रभोऽत्र राज्यं कुरु वानराणां पम्पापुरेऽत्यन्त सुखेन सर्वदा ॥
वाक्यंसमाकर्ण्य स वानरस्य सुग्रीव संज्ञस्य जगाद रामः ॥८॥
यतः पुरेनप्रविशाम्यहं सखे ? कुरुष्वराज्यं शुभदं ततस्त्वम् ॥
तथाऽङ्गदं स्थापय यौवराज्ये प्रवर्षणाद्रौ प्रवसाम्यहं ततः ॥९॥
किञ्चिद्दिनं यापय राजधान्यां व्यतीत्यवर्षां मम प्राणदायाः ॥
अन्वेषणे त्वं भव यत्नवाँस्तदा प्राहेतिवाक्यं रघुनायकस्तम् ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामाज्ञया सम्प्रययौ सुमित्रः पम्पापुरे वानरसत्तमाय ॥
राज्यंददौ वालिसुतं तथैव संस्थापयामास स यौवराज्ये ॥११॥
सौमित्रि रागत्य ततः समीपं रामस्य चात्यन्तमुदान्वितोऽवसत् ॥
संस्थाप्य राज्येऽतिमुदा स्वमित्रं सहानुजस्तत्र गिरौप्रवर्षणे ॥१२॥
गुहांसमालोक्य मनोभिरामां सुविस्तृतां सर्वसुखोपयुक्ताम् ॥
रामोऽवसत्तत्र सुखेन सानुजो वर्षां समासाद्य नगोत्तमस्य ॥१३॥
प्रवर्षणे तत्र निवासतस्तयो र्निर्धूतपापाः पशुपक्षिसंघाः ॥
विहायवैरं प्रविलोक्य रामं परस्परं सज्जनताः प्रपेदिरे ॥१४॥
रामस्यसेवां कुरुतेहि लक्ष्मणः प्रवर्षणेऽत्यन्त सुचेतसा तथा ॥
फलैः सुपुष्पैर्विमलोदकैः सदा रामंसमभ्यर्च्य सुखेनसंस्थितः ॥१५॥
रामात्समाश्रुत्य कथानकं शुभं रात्रिन्दिवाध्यानतएव लक्ष्मणः ॥
शेषोप्यसौ यद्यपि रामसेवनात् वभूवसद्यः किल कोपवर्जितः ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवर्षणे यस्य तरोस्तलेविभुः पर्णालये वन्धुसमन्वितोऽवसत् ॥
तमेव सर्वे प्रसशंति पादपाः सन्तानवृक्षस्य विहाय सद्गुणान् ॥१७॥
देवाः स्वलोकं प्रविहाय सर्वे मृगाः खगास्सत्र गिरौ वभूवुः ॥
रामाननं ते प्रविलोकयन्तः स्वर्गस्य सौख्यानि लघूनि मेनिरे ॥१८॥

इती श्रीमद्बालबोध रामायणे किष्किन्धा काण्डे चतुर्थः सर्गः ॥४॥

एवं चतुर्मासमतीत्य रामः स्मृत्वाचसीता मिदमाह लक्ष्मणम् ॥
सीताविनीता मम केन काननात् स्थिताऽधुनाकुत्र न वेद्म्यहन्ताम् ॥१॥
जायां न मे मार्गयितुं कपीशः समागतो राज्यमदाभिभूतः ॥
निहन्म्यहं तं शृणु वालिवद्द्रुतं श्वएव हर्यृक्षयुतं न संशयः ॥२॥
श्रुत्वा सुमित्रातनयः स तस्मात् सम्प्रस्थितस्तस्यवधाय कोपतः ॥
सवानरं तं विनिहत्य शीघ्रं समागमिष्यामि तवान्तिकं प्रभो ? ॥३॥
गन्तुं समालोक्य वधायतस्य रामोऽवभाषेऽनुजसन्निधौ वचः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रातः ? स मेऽत्यन्त हितेरतःसखा निहन्यतां मा किमुभीषयित्वा ॥४॥
नीत्वा सखायंहि समाव्रजन्वं कार्यं करिष्यामि विविच्य तेन ॥
श्रुत्वा वचस्तद्रघुनायकस्य बभूव शेषः किल कोपवर्जितः ॥५॥
नीत्वाधनुर्वामकरेण सद्यः शरञ्च नीत्वा खलु दक्षिणेन ॥
ययावरं दर्शयितुं स्वमन्युं पम्पापुरं वानरराजधान्याम् ॥६॥
विस्मृत्य कार्यं रघुनायकस्य स्थितं कपीशं प्रविलोक्य तत्र ॥
उवाच गत्वा पवनात्मजस्तं रामस्यकार्यं किमु विस्मृतोऽसि ॥७॥
त्वञ्चापि सत्यं प्रहनिष्यसे यतो रामस्यकार्यं न करोषि यत्नतः ॥
निशम्यवाक्यं मरुदात्मजस्यतत् जगाद भीत्याऽतिशयेन भूमिपः ॥८॥
उक्तं त्वयाऽत्यन्तहितं मदर्थं कुरुष्वकार्यं ममभाषितं त्विदम् ॥
सखेऽयुतं मार्गयितुं विदेहजां सम्प्रेष्यदूतानतिभीमविक्रमान् ॥९॥
संगच्छ रामस्य हिताय सद्यः कुरुष्व सीताऽधिगमे प्रयत्नम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येद्वीप सप्तान्तर मध्यवर्तिनो हरिप्रवीराः खलु भल्लुकाश्च ॥१०॥
सर्वान् समादाय समाव्रजत्वं पक्षान्तरेऽस्मिन्नगरे हिताय मे ॥
अतीत्य पक्षंच समाव्रजेद्यः स मेऽत्रवध्यः प्रभवेन्नसंशयः ॥११॥
श्रुत्वाहनूमान्नृपभाषितंतत् सर्वं चकारातिशयेन प्रेमतः ॥
समागतस्तत्र स लक्ष्मणः स्वयं क्रोधान्वितस्तम्प्रविलोक्य वानराः ॥१२॥
निगृह्य वृक्षोपलपर्वतादीन् ययुद्रुतं तम्प्रति भीमविक्रमाः ॥
निवारयामास हरीन् ततोङ्गदो विलोक्य शेषस्य पुरेसमागमम् ॥१३॥
गत्वाऽन्तिकं तस्य ननाम पादौ सचापि पार्श्वे विनिवेश्य चाह ॥
व्रजाशु हेवत्स ? ममाऽनु शासनात् सुग्रीव मासाद्य निवेदयत्वम् ॥१४॥
शरेण येनैव हतः स वाली हनिष्यसे त्वञ्च तथैव तेन ॥
सम्प्राप्य राज्यं मदगर्वितो भूर्वधायतेरामशरः प्रतीक्षते ॥१५॥
इत्येव शेषः समुवाच तुभ्यं प्रतिक्रियां तस्य विधेहि तूर्णम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वाङ्गदः स्वस्वयपुरे पितृव्यं सम्प्राह सर्वं खलु लक्ष्मणोक्तम् ॥१६॥

इति श्रीमद्बालबोधरामायणे किष्किन्धाकाण्डे पञ्चमः सर्गः ॥५॥

श्रुत्वा भयादाह हरीश्वरस्ततो मरुत्सुतं बुद्धिमताम्वरिष्ठम् ॥
हेमारुते ! त्वं व्रज चाङ्गदेन सहैवसद्यः खलु लक्ष्मणान्तिकम् ॥१॥
क्रोधं निवार्यात्र तमानयत्वं ममान्तिकं मे हृदयं प्रकम्पते ॥
श्रुत्वाहनूमान् प्रययौ हि तत्र रामानुजस्यान्तिक मङ्गदेन ॥२॥
सहैव नत्वा चरणौ हि तस्य जगाद वाक्यं खलु भूतपूर्वम् ॥
श्रीभूसुतायाः परिमार्गणे हरीन् सम्प्रेषयामास यथा हरीश्वरः ॥३॥
यथा समानेतु मितः स्वयंयथा गतश्च द्वीपान्तरतोपि वानरान् ॥
वाक्यं समाकार्ण्य मरुत्सुतस्य हृष्टोबभूवातिशयेन लक्ष्मणः ॥४॥
ततः समानीय नृपान्तिकं तं मपूजयामास नृपेण सार्द्धम् ॥
सुसत्कृतस्तत्र कपीश्वरेण सुखोपदिष्टः स रघूत्तमानुजः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपीश्वरं प्राह रघूत्तमानुजो भयंन किन्ते रघुनायकस्य ॥
हनिष्यसे त्वं रघुनायकेन वालीहतो येनशरेणतेन ॥६॥
श्रुत्वा हनूमानतिरौद्रवाक्यं निवारयामास रघूत्तमानुजम् ॥
वदस्व मा वाक्यमनर्गलं त्विदं त्वत्तोधिको रामपदेऽस्य प्रीतिः ॥७॥
श्रुत्वा सुवाक्यं पवनात्मजस्य बभूव सौमित्रिरतीव लज्जितः ॥
उक्तम्मया क्रोधवशात्क्षमस्व संगच्छ रामान्तिक मब्रवीदिदम् ॥८॥
ततः कियत्काल मतीत्य तत्र रामानुजस्तं समुवाच भूपतिम् ॥
व्रजाम्यहं रामसमीपमत्र यतो न हृष्टः खलु रामचन्द्रः ॥९॥
रामेण सीतामविलोक्य दुःखं न सह्यते संशृणु वानरेन्द्र ? ॥
वाक्यं समाकर्ण्य स लक्ष्मणस्य रामान्तिकं गन्तुमतीवहर्षात् ॥१०॥
सम्प्रस्थितः सैन्यसहैव तस्मात् राजोपचारै रखिलैः सलक्ष्मणः ॥
भेरीमृदंगैः पणवानकैश्च भृङ्गैस्तथा वानरभल्लुकैर्वृतः ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वेतातपत्रै र्व्यंजनैः सुकेतुभिर्नृपः ससौमित्रि रतीवरञ्जितः ॥
रथोपरिस्थो रथचक्रनिःस्वनै र्दिशामभिव्याप्य विचित्रवर्णैः ॥१२॥
नीलाङ्गदाद्यै र्हनुमत्प्रधानै र्वृतो ययौ राघवमन्तिकं नृपः ॥
समागतं तं परिवीक्ष्य रामः प्रापूजयद्वै विधिवद्विधिज्ञः ॥१३॥
क्षेमंविदित्वा कपिनायकस्य स्वयंच शं स्वं समुदाजहार ॥

इति श्रीमद्बालबोधरामायणे किष्किधाकाण्डे षष्ठः सर्गः ॥६॥

ततश्च रामं समुवाच भूपः प्रपश्य सैन्यानि बलान्वितानि ॥१॥
नलं च नीलंहि तथासुखेणं गजं गवाक्षाङ्गद गन्धमादनान् ॥
दधीमुखं केशरिणञ्च पश्य सुतोऽस्तियस्यामितविक्रमान्वितः ॥२॥
मयन्दसंज्ञं द्विविदाख्यकञ्च तथैव रम्भं सरभादि वानरान् ॥
गजं तथावै पनसं सुवीरं वलीमुखादीनपि पश्य सर्वान् ॥३॥
तथा प्रपश्यात्रच भल्लुकाना मधीशमेनं किल जाम्ववन्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वातात्मजस्यास्य बलस्य कर्तुं न वर्णनं कोऽपि भवेत्समर्थः ॥४॥
यतस्त्वसौ स्वादुफलस्य बुद्ध्या जग्राह भानुं ननु बालकाले ॥
सर्वे प्रभो ? ते वशवर्तिनश्च दन्तैर्नखैर्भूधर वृक्षयोधिनः ॥५॥
तथा फलाहाररताश्च सर्वे समुद्यताः शत्रुनिपातने सदा ॥
देवांशभूताः कपिभालुसंघाः सेवार्थिनो राम ? तवैव सर्वे ॥६॥
श्रुत्वा कपीशस्य वचो हि रामो विहस्य वाक्यं नृपभावभाषे ॥
ज्ञातम्मया चास्य बलस्य गौरवात् सखे ? स्थितस्त्वं सदने निराकुलः ॥७॥
नियुंक्ष्व सीतापरिमार्गणेऽस्मात् चेद्रोचते ते कपिभालुवीरान् ॥
रामाज्ञया तत्र कपीश्वरेण सम्प्रेषिताः सर्वदिशां हि वानराः ॥८॥
याम्यां दिशां सत्वसमन्विता द्रुताः सम्प्रेषिताः वानरभालुनायकाः ॥
नलं सुखेणं सरभञ्च मैंदं मरुत्सुतम्वै द्विविदाङ्गदौ च ॥९॥
ऋक्षाधिपञ्चाप्यवदत् कपीशो याम्यां दिशांतान् प्रतिगन्तुकामान् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मासैक मध्ये जनकात्मजायाः वार्तां समादाय समाव्रजन्तु ॥१०॥
नपूरयेयुर्वचनं मदीयं प्राप्स्यन्ति सर्वे खलु दण्डमुग्रम् ॥
सम्प्रेष्य सर्वानति भीमविक्रमान् कपीश्वरो रामसमीप संययौ ॥११॥
रामो व्रजन्तं प्रविलोक्य मारुतिं प्रोवाच वाक्यं शृणु मारुते ? मे ॥
विस्वासहेतोर्मम मुद्रिकां त्वं निगृह्य संगच्छ ममप्रियायाः ॥१२॥
करिष्यते कार्य मिदं त्वयैव चेतोमदीयं प्रसभं प्रवक्ति ॥
ततोहनूमानतिहर्षितो द्रुतं प्रणम्य रामञ्च निगृह्य मुद्रिकाम् ॥१३॥
ययौ मुदा वालि सुतादिभिः समं सीतां विचिन्वन् लवणाम्बुधेस्तटम् ॥
ततश्च ते तत्र मिथोवदन्ति करोमिकिं नाधिगताहि सीता ॥१४॥
मासे गतेऽस्माभिरवश्यमेव दण्डः प्रचण्डः प्रभुतोऽत्रप्राप्स्यते ॥
इतःपरं नैव विदृश्यते यतो मार्गः प्रमन्तुं खलु तद्दिशायाः ॥१५॥
सर्वे निषीदन्ति तटेऽर्णवस्य विलोक्य सिन्धुं विमनायमानाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः कियत्काल मतीत्यतत्र सम्पातितस्तै र्विदिताः सुवार्ताः ॥१६॥
महार्णवस्यास्य तटे सुयास्ये लङ्केतिरम्यं नगरं विराजते ॥
स्थिताच तत्रैव विदेहकन्या ह्यशोकवृक्षस्य तलेऽतिशोभने ॥१७॥
उल्लंघ्य सिन्धुं शतयोजनायतं यस्तत्रगच्छेत् स विलोकयेत्ताम् ॥
श्रुत्वावचस्तत् प्लवगाग्रगण्याः गृध्रस्य चोत्कण्ठहृदो बभूवः ॥१८॥

इति श्रीमद्बालबोधरामायणे किष्किन्धा काण्डे सप्तमः सर्गः ॥७॥

परं समुद्रं प्रविलोक्यसर्वे भयंकरं नक्रझषादिभिर्युतम् ॥
कश्चात्र तीर्त्वा जलधावतीव भयंकरं कार्यमिदं करिष्यति ॥१॥
उल्लंघ्य सिन्धुं प्रविलोक्य सीतां पुनः समागत्य निवेदयेद्वः ॥
रामाय सर्वं स कपेर्गणस्य प्राणस्यदाता प्रभवेन्नसंशयः ॥२॥
विलोक्य सर्वानति भीतियुक्ता नुवाच तस्मिन्समयेऽङ्गदोद्रुतम् ॥
पृथक् पृथक् स्वस्यबलं ममाग्रे समुच्यतां कार्यसुसिद्धयेऽधुना ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्यं समाकर्ण्य ततोऽङ्गदस्य विभाषयन्तः स्वबलानि सर्वे ॥
यदा बभूवात्र भुवित्रिविक्रमो नारायणो वामनरूपतः स्वयम् ॥४॥
तदाऽप्रमेयं सुवपुर्हरेस्तत् दृष्ट्वाऽल्पकालेन च तत्प्रदक्षिणम् ॥
चकार तस्मिन् समये युवाऽहं नविद्यतेऽस्मिन्समये बलन्तत् ॥५॥
येनाम्बुधेः पारमवेत्य तत्र करोमिकार्यं रघुनायकस्य ॥
ऋक्षाधिपस्यामल भाषितंतन्निशम्य तारातनयोप्युवाच ॥६॥
समुद्रमेनं प्रविलंघयामि परं पुनश्चागमनेऽस्ति संशयः ॥
एवञ्च सर्वे स्वबलं पृथक् पृथक् प्रोचुर्हि तस्मिन्समयेऽर्णवस्य ॥७॥
तीरे परं पारमुपेत्य सीतामालोक्य सिन्धुं प्रतराम्यहम्पुनः ॥
नकोप्युवाचेति निशम्य तत्र बभूवुरत्यन्त समाकुलास्ते ॥८॥
ततोऽङ्गदस्तानिदमाह तत्र सर्वैश्शृणुध्वं वचनं ममेदम् ॥
सीतामनालोक्य प्रवर्षणाद्रौ नाहं गमिष्यामि कपीशसन्निधौ ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दयानकिञ्चिन्मयि तस्यचित्ते भवेत्ततोऽत्रैव विहाय जीवनम् ॥
यास्यामि सद्यः सदनं यमस्य पश्यन्तु सर्वे प्लवगाग्रगण्याः ॥१०॥
सर्वे समाकर्ण्य वचोऽङ्गदस्य नेत्राज्जलं सम्मुमुचुर्हरीन्द्राः ॥
विलोक्यतानृक्षपतिर्बभाषे कार्यंभवेद्वायुसुता दवश्यम् ॥११॥
जग्राह यो जन्मनि भास्करं खे सोऽद्यात्र सिन्धोस्तरणेनकिं क्षमः ॥
कुरुष्वकार्यं सुत ? राघवस्य संरक्षप्राणानिह वानराणाम् ॥१२॥
यतोऽवतारस्तव मारुतेऽयं रामस्यकार्याय न तत्र संशयः ॥
अतः समुत्तिष्ठ सखे ? व्रजस्व समुद्रमुल्लंघ्य विदेहजायाः ॥१३॥
वार्तां समादाय निवेदयस्व रामाय सर्वं स्वबलाद्धनूमन् ? ॥
नचेन्मरिष्यन्त्यधुनैव वानरास्तवाग्रतः सत्यमवेहि सुव्रत ? ॥१४॥
वातात्मजो वानरयूथपानां मध्येप्रहृष्टः स्वबलंनिशम्य ॥
विलोक्य सर्वान् प्रणतान् प्लवंगमान् महाबली तत्र जगर्ज चासकृत् ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वा जाम्बवतो वभूव सुभटान् तान्पश्यतोद्र्वै: समः
कृत्वानाद मतीव तत्र जलधिं जतुं मनः सन्दधे ॥
सिन्धोः पारमवेत्य रावणगलं वद्ध्वादृढं रज्जुतो
धृत्वा वामकरान्नयामि पुरतो रामस्य माम्पश्यत ॥१६॥
हत्वा तस्यपुरोऽत्र वीरसकलान् चोत्पाद्यवै वाटिकां
दग्ध्वा तस्यपुरीञ्च भूमितनयां नीत्वाऽऽगमिष्याम्यहम् ॥
किं कुर्वेऽथ विविच्य माम्वद सखे ! ऋक्षेश ! सर्वन्त्विदं
तत्कार्यम्प्रकरोम्यहं जलनिधेः पारं परम्प्राप्य च ॥१७॥
श्रुत्वा प्राह मरुत्सुतं प्रियसखे ! हेमारुते ! तत्पुरे
गत्वा भूमिसुतामवेक्ष्य सुमुखीं प्रावर्त्य तद्राघवौ ॥
उक्त्वा राघवयोर्वृतं कपिपतीं नीत्वा सुसैन्यैर्वृतं
गत्वा तत्र पुनः स्वसत्व मनुपं दर्शिष्यसि त्वं शृणु ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती श्रीमद्बालबोध रामायणे किष्किन्धा काण्डे अष्टमः सर्गः ॥८॥

इति किष्किन्धाकाण्डं समाप्तम् ॥

॥*॥ अथसुन्दर काण्डम् ॥*॥

सीतायाः परिमार्गणेहि परितः सम्प्रेष्य शाखामृगान्
वासौयेन सहानुजः सुसखिना सार्द्धं कृतः पर्वते ॥
तस्यैवामलपादपद्म मनिशंध्यात्वाहृदि प्रेमतः
काण्डं सुन्दरसंज्ञकं सुललितं वक्ष्याम्यहं नूतनम् ॥१॥
प्रसार्यबाहुद्वय मम्बरात्कपि र्दिशांहि याम्यामतिवेगतो द्रुतम् ॥
पदद्वयाकुञ्चित ऊर्ध्वदृष्टिं कृत्वा ययौ वायुसुतः स वायुवत् ॥२॥
दृष्ट्वा व्रजन्तं पवनात्मजंकपिं विहायसा देवगणाः समूचुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुलक्षणामेत्य ततोऽहिमातरं प्रगच्छमात लँवणाम्बुधेस्तटम् ॥३॥
परीक्षणार्थं हरिसत्तमस्यवलस्य लङ्कां गमनेऽस्ति शक्तिः ॥
नवेतिबुद्ध्वा पुनराव्रजत्वं श्रुत्वा ययौ सा सुरसाऽम्बराञ्चरा ॥४॥
गत्वा पुरस्तस्य महाकपेः साऽवदन्मुखे मे प्रविशस्व मारुते ! ॥
प्रविश्य वक्त्रं मम गच्छ नोचेद्विभक्षयिष्यामि सुनिश्चितं त्वाम् ॥५॥
श्रुत्वा तदीयं वचनं हरीशः प्रोवाचवाक्यं विनयान्वितःसन् ॥
व्रजामि लङ्कां रघुनायकस्य कार्याय सत्यं प्रकरोमि मातः ! ॥६॥
विलोक्य सीतां विनिवेद्य रामं समागमिष्यामि तवाननेऽहम् ॥
श्रुत्वावचः सा प्लवगेश्वरस्य कोपादिमम्प्राह हरीश्वरं प्रति ॥७॥
त्वमद्य देवैः परिकल्पितो मे भक्ष्यस्ततो मे मुखमाविशाशु ॥
प्रविश्य वक्त्रं मम गच्छ नोचेद्भक्ष्याम्यहं त्वां प्लवगाग्रगण्य ! ॥८॥
वाक्यं समाकर्ण्य स नागमातृतो रोषादिदम्प्राह शृणुष्व शोभने ! ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदारयस्वाशु मुखं विशामि यास्यामि लङ्कां त्वरितं तवाग्रतः ॥९॥
उक्त्वेति देहं समधारयत्कपिः पुरोऽथतस्याः खलु योजनायुतम् ॥
दृष्ट्वा स्वरूपं पवनात्मजस्य ततोऽधिकं सा विददार वक्त्रम् ॥१०॥
कपिः समालोक्य मुखं स तस्या दधार देहं द्विगुणं मुखात्पुनः ॥
कपेः स्वरूपं प्रविलोक्य तादृक् वक्त्रं चकाराशु पुनस्ततोऽधिकम् ॥११॥
ताभ्यां कृते रोषत एवतत्र महार्णवस्योपरि खेऽतिकौतुके ॥
ततोविदीर्णं वदनं महान्तं विलोक्य वायोस्तनयः सलीलम् ॥१२॥
कृत्वातनुं सूक्ष्मतरं स सद्यो मुखे समाविश्य पुनर्बहिर्गतः ॥
उवाच वाक्यं मुख निर्गतोऽसौ व्रजाम्यहं देवि ! नमोस्तु तुभ्यम् ॥१३॥
दत्वाऽऽशिषं सा प्रययौहि लोकं देवस्य तस्माद्धरिसत्तमोऽपि ॥
ययुर्लघुर्याम्यदिशां प्रवेगाच्चापात्प्रमुक्तं सुशिलीमुखं यथा ॥१४॥
ततः सलीलं कपिमाव्रजन्तं श्रीरामदूतं नभसा सुखेन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८० /

सं वीक्ष्य तं सिन्धुरुवाच शैलं मैनाक संज्ञं स्वजले प्रमग्नम् ॥१५॥
विश्रामहेतोः कपिसत्तमस्य ममाज्ञया त्वं व्रज शैलसत्तम ? ॥
व्रजत्यसौ श्रीरघुनायकस्य कार्याय मद्वंशसमुद्भवस्य ॥१६॥
वाक्यं समाकर्ण्य स वारिधेस्ततत स्तोयाद्विनिर्गत्य कपेः सुमार्गे ॥
ययौनगः स्वर्णमयैः सुशृंगैर्श्चैरनेकैः फलपुष्पितैश्च ॥१७॥
उवाच वाक्यं मरुदात्मजंतं मनुष्यरूपं विदधन्स तत्र ॥
विश्रामहेतोस्तव सिन्धुनाऽहं सम्प्रेषितस्तेन प्रतिष्ठ मारुते ? ॥१८॥
ममोपरित्वं समयं कियत्कपे ? विभुंक्ष्व पक्वानि फलानि सम्यक् ॥
ततोयथेच्छं त्वमितो गमिष्यसि स्पृष्ट्वा करेणाह कपिः सुशैलम् ॥१६॥
रामस्य कार्याय प्रगच्छतो मे कुरुष्व मार्गे नहि भोजनाग्रहम् ॥
सीतामनालोक्य तथा न मार्गे करोमिविश्राम मतः क्षमस्व ॥२०॥
उक्त्वेति दूरंप्रगतः कियत्ततो हरिर्गृहीतः स निशाचरीतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जलेस्थिता या परिगृह्य छाया माकाशगानां प्रविभक्षयित्री ॥२१॥
सा सिंहिका तस्य विधृत्यच्छाया माकर्षयत्स्वाभिमुखेऽतिरोषात् ॥
अचिन्तयच्चेतसि तत्र मारुति र्वेगस्य मे केन कृतम्प्ररोधनम् ॥२२॥
रूपंनकस्यापि विदृश्यते मया ततःस दृष्टिं समपातयज्जले ॥
दृष्ट्वा कपिस्ता मवधोज्जलौघे मृता च सा सोऽपि ययौ स्वमार्गे ॥२३॥
गत्वा कियद्दूर मतीववेगाद्ददर्श लङ्कां मणिरत्नभूषिताम् ॥
नानाविधैः स्वर्णमयैः सुमन्दिरै स्तथाभटै श्चातिभयङ्करैर्वृताम् ॥२४॥
ततः परम्पारमवेत्य वारिधे र्दिनावसाने स कपिः प्रशोचते ॥
प्रविश्यरात्रौ नगरीं हि लङ्कां सीतांविचिन्वन् प्रचरामि सर्वतः ॥२५॥

इति श्रीमद्बालबोधरामायणे सुन्दरकाण्डे प्रथमः सर्गः ॥१॥

ततो निशायामति सूक्ष्मरूपं धृत्वा जगामाशु पुरीं स लङ्काम् ॥
स्थिता पुरद्वारबहिर्निशाचरी नाम्नाप्रसिद्धा खलु लङ्किनीसा ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वाव्रजन्तं पवनात्मजं कपिं कस्त्वं कपे ? किम्वद कार्यमत्र ॥
रात्रौ कथं चोरवदेव लङ्का प्रयासि सा तं समुवाच कोपात् ॥२॥
उक्त्वाह्यहन् वायुसुतं पदा सा,, अताड़यद्वामकरेण सोऽपि ॥
पपात भूमावतिशोकसंयुता रक्तं वमन्ती प्रबभूव मूर्च्छिता ॥३॥
अवाप्यसंज्ञा मवदत्कपीन्द्रं व्रजस्व चास्मिन्नगरे वनालय ? ॥
भवेद्विनाशः खलु राक्षसानां धात्रोदितं नैव भवेदतथ्यम् ॥४॥
सीता स्थिता संशृणु वाटिकायाः अशोकवृक्षस्यतलेऽस्ति शोभने ॥
गत्वा प्रपश्याशु निशाचरीणां मध्येऽतिदुःखेन समाकुलाङ्गताम् ॥५॥
ततो हनूमान्प्रययौ स तस्मात् सीतां विचिन्वन्दशकन्धरालये ॥
सीतामनालोक्य विचिन्तितः स सस्मारवाक्यं गगनेचरस्य ॥६॥
पुनर्विचिन्वन् प्रययौहि तत्र कपिद्रुतं तत्प्रमदा वने शुभे ॥
ददर्श सीतां करुणान्वितां ता मशोकमूले भुविभार्गवीमिव ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपोधनां तां मलिनाम्बरान्वितां कृशोदरीं व्योमचरीगणैर्वृतां ताम् ॥
हाराम रामेति मुहुर्लपन्तीं मरुत्सुतो वीक्ष्य बभूव दुःखितः ॥८॥
प्रणम्य सीतां मनसा स मारुतिः समागतं वीक्ष्य दशाननासुरम् ॥
पत्रान्तरे तस्यतरोर्विलीनः शृणोति वाक्यं दशकन्धरस्य ॥९॥
दशाननो भूमिसुतामभाषयत् शुचिस्मिते वेश्मनि मे व्रजत्वम् ॥
विलोक्य दुःखं विपिने त्वदीयं मनोमदीयं विमनायतेऽधुना ॥१०॥
रामेण किन्ते समभूद्वदस्व मयान किम्वा वद सम्भविष्यति ॥
विमृश्य सर्वं मनसाऽद्यराज्ञी ममालये सौम्यमुखी भवाशु ॥११॥
रामो मनुष्यः प्रकरोति किन्ते पित्र्युज्झितः सौम्यगुणैर्विवर्जितः ॥
स्पृहा न किञ्चित्त्वयि तस्य चित्ते रामं विसृज्याशु भजस्वमामिति ॥१२॥
श्रुत्वेति वाक्यं दशकन्धरस्य तृणं विधायान्तर मेकमाशु ॥
ध्यात्वाच रामं मनसाऽवदत्सा शृणुष्ववाक्यं मम राक्षसाधम ! ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेदुष्ट ! रामस्य शराभिघाताद्द्रक्ष्यन्ति नूनं निपतच्छिरांसि ॥
लोकाः प्रपश्यन्ति शृणुष्व तद्वत् पतन्ति तालस्य फलानि यद्वत् ॥१४॥
श्रुत्वा वचस्तज्जनकात्मजाया श्चोत्पाद्य खड्गं स ययौ निहन्तुम् ॥
निवारयामास पतिं पतिव्रता मन्दोदरी राक्षसनायकं तम् ॥१५॥
निवर्तयामास ततो निशाचरो जगादमध्ये स निशाचरीणाम् ॥
मासद्वयस्यान्तरमेव सीता शय्यांमदीयां यदि नन्दयिष्यति ॥१६॥
तदाऽत्र सौख्यानि विभोक्ष्यतिद्रुतं नचेत्समासाद्य निहन्मि मानुषीम् ॥
सर्वा यतध्वं ममवाक्यतः स्त्रियः सीताभवेन्मेवशगा यथाऽशु ॥१७॥
उक्त्वेतिवाक्यं प्रययौ दशास्य स्तास्तां समासाद्य विभीषयन्त्यः ॥
कुरुष्व सेवामिह रावणस्य सीते ! द्रुतं तेऽति शुभं भविष्पति ॥१८॥
व्रजस्व भद्रे ! भवनं नृपस्य दशाननस्यामर सन्निभस्य ॥
ममैववाक्यात्समुवाच चान्या यतोऽन्यथा नैव भवेद्धितन्ते ॥१९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्याऽवदद्गच्छ दशाननं त्वं विसृश्य देवासुरनायकन्तम् ॥
अरं चिरंमाकुरुमानुषी ! त्विदं नेष्यामि ग्रीवांपरिगृह्यनोचेत् ॥२०॥
तथाऽपराप्याह शृणुष्व सीते ! न रावणान्मोचयितुं समर्थः ॥
त्वां राघवस्तेन कुरुष्वप्रीतिं दशाननेनामित विक्रमेण ॥२१॥
नचेन्नखैर्मे परिपश्य देह मेभिश्चसर्वं तवदारयामि ॥
उद्यम्य खड्गं समुवाच काचित् सीते ! द्रुतं गच्छ दशाननालयम् ॥२२॥
नचेदहं त्वांप्रकरोमि भक्षणं कृत्वाऽसिना सम्प्रति खण्डखण्डम् ॥
निशम्य सीता वचनं निशायां निशाचारीणां परुषं भृशंतत् ॥२३॥
विसृज्यधैर्यं प्ररुरोद सद्यो वृक्षस्य शाखां परिगृह्यपुष्पिताम् ॥

इति श्रीमद्बालबोध रामायणे सुन्दरकाण्डे द्वितीयः सर्गः ॥२॥

श्रुत्वा च दृष्ट्वा त्रिजटाऽब्रवीत्तान्नभीषयध्वं रुदतीं विदेहजाम् ॥१॥
दृष्टं मया स्वप्नमतीव भीषणं शृण्वन्तु सर्वाः परमाद्भुतं तत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समागतश्चैक कपिर्महाबलः सीतां समाभाष्य ददाह लङ्काम् ॥२॥
वनञ्च तेनैव विनाशितं द्रुतं हत्वासुतं राक्षसनायकस्य ॥
बलानि सम्मर्द्य स रामसन्निधौ जगाम निर्विघ्नत एव वानरः ॥३॥
रामं समादाय पुनः सएव समागतो वानरभालुसैन्यैः ॥
बलस्य यस्यामरसन्निभस्य रणे न पारं प्रययुर्निशाचराः ॥४॥
रामोनिहत्यात्र रणे दशास्यं समर्प्य राज्यं स विभीषणाय ॥
सीतां समादाय सलक्ष्मणेन ययावयोध्यां कुशलेन रामः ॥५॥
निशम्य वाक्यं खलुतत्र तस्याः विनिद्रितास्ताः समुपाययुर्भयात् ॥
सीताऽतिदुःखेन रुरोद तत्र हानाथ हादेवरलक्ष्मणेति ॥६॥
विभक्षयिष्यन्ति निशाचराणां भार्याः प्रभाते ननुमामनाथाम् ॥
प्राणान्ततां नैज्यकरेण कृत्वा तूर्णं प्रयास्यामि यमस्यसादनम् ॥७॥
एवंविलप्यातिशयेनशोकाच्चकार सीता मरणस्य निश्चयम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वा च दृष्ट्वा खलु तत्र मारुतिः पत्रान्तरात्तस्य तरोर्विमृश्य ॥८॥
उवाच सर्वं खलु मन्द मन्दं रामस्य वृत्तान्त मशेषमादितः ॥
सीता तदाकर्ण्य विलोक्य सर्वतः प्रोवाच वाक्यं मुदमावहन्ती ॥९॥
संश्रावितं येन कथानकामृतं स दृश्यतां मे पुरतः प्रयातु ॥
श्रुत्वा हनूमानति हर्षतोययौ कपिस्वरूपेणपुरः स तस्याः ॥१०॥
कृत्वा प्रणामं प्लवगः स तस्याः वद्धाञ्जलिःसन् पुरतः स्थितोहि ॥
विलोक्य सा तं समुवाच वानरं कस्त्वं कुतश्चात्र समागतोऽसि ॥११॥
श्रुत्वा कपिस्तत्समुवाच सीतां रामस्प वृत्तान्तमशेष मादितः ॥
"सीताहृति हैमसृगस्य मारणं जटायुषः स्वर्गगति यथाऽभवत् ॥१२॥
कवन्धमोक्षं कपिना सुमैत्री वालिप्रणाशः परिमार्गणे त्वाम् ॥
यथा कपोशेन विसर्जिताश्च दूता यथा पक्षिविभाषणा त्स्वयम् ॥१३॥
उल्लंघ्य सिन्धुं शतयोजनायतं समागतस्तत्र समाजगाद" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः स तस्यै प्रददौ सुमुद्रिकां प्रोवाच विश्वास निमित्तकारिणी ॥१४॥
रामेणदत्ता खलु मुद्रिकेयं प्रयाणकाले परिपश्य मातः ! ॥
वाक्यंसमाकर्ण्य मरुत्सुतात्सा सीतागृहीत्वा मणिमुद्रकां ततः ॥१५॥
दृष्ट्वाङ्कितं तत्र सुराम नाम निधाय चित्ते समुवाच मारुतिम् ॥
दु:खं मदीयंखलु यत्प्रदृष्टं रामं समासाद्य कपेऽनुकम्पया ॥१६॥
सर्वं त्वया वाच्यमिदं चरित्रं वाचापि धर्मं समुपेहि वानर ! ॥
रामस्तथा लक्ष्मणवानराधिपौ यथाऽऽव्रजेत् सैन्यसमन्वितश्च ॥१७॥
हत्वादशास्यं सवलं हि मामितो नीत्वा पुरींस्वस्य यथापरिव्रजेत् ॥
तथा यतस्वाशु विविच्यसर्वं मूर्ध्वं द्विमासान्न स मांलभेत ॥१८॥

इति श्रीमद्वालवोधरामायणे सुन्दर काण्डे त्रितीयः सर्गः ॥३॥

वाक्यंसमाकर्ण्य स भूसुताया मरुत्सुतस्तामिदमाह सद्यः ॥
मातः ! समाकर्ण्य मदीयवाक्यं रघूत्तमौद्वौ कपिनायकोऽपि ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलैःसमेतः प्रविलंघ्यसागरं समागमिष्यन्ति तवैवहेतोः ॥
दशाननं चात्र निहत्य रामः सवान्यवं त्वां स्वपुरीं नयेद्ध्रुवम् ॥२॥
रामेण दत्तामणिमुद्रका यथा विस्वासहेतोश्च तवैव मातः ? ॥
प्रदेहि किञ्चिद्रघुनायकस्य तथैव विश्वासकरं सुचिह्नम् ॥३॥
सीता समाकर्ण्य शिरोरुहाद्ददौ चूड़ामणिं वानरसत्तमाय ॥
नीत्वा कपिस्ता मिदमाह मातर्विभुक्षितोऽहं बहुवासरेण ॥४॥
प्रविश्य चास्मिन्विपिने तवाज्ञाया सम्यक् सुपक्वस्य फलस्य भोजनम् ॥
कृत्वाऽतिसन्तुष्टमना स्तवाग्रतो यास्याम्यहं राघवयोः समीपम् ॥५॥
निशम्यवाक्यं मरुदात्मजस्य सीता कपिम्प्राह शृणुष्व सौम्य ? ॥
सन्त्यत्र वीरा बहवोहि रक्षिणः कपे ? कथं पक्वफलस्यभोजनम् ॥६॥
करिष्यसि त्वं लघुरूपधारी श्रुत्वाकपिः स्वर्णगिरेः समोऽभवत् ॥
सीताऽथ सम्वीक्ष्य कपेः स्वरूपं निशाचराणां भयदायकं तत् ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच भोक्तुं व्रजमारुते ! त्वं बुभुक्षितश्चेत्प्रभवे च्छुभन्ते ॥
प्रणम्य पादावथ भूसुतायाः विवेश सद्यो विपिने हनूमान् ॥८॥
मुखे फलंन्यस्य तरून्विशालानुत्पाट्य चिक्षेप महार्णवे सः ॥
प्ररक्षिणस्तत्र कपेःस्वरूपं विलोक्य कार्यं कठिनं च तस्य ॥९॥
आहूय चान्यान्वलिनो निशाचरान् ययौनिहन्तुं कपिकुञ्जरन्तम् ॥
भूवव युद्धं विपिनेऽतिघोरं निशाचराणां कपिनायकेन ॥१०॥
परं हतास्ते कपिना हि तेन महावलेनामित विक्रमेण ॥
हतावशिष्टाः प्रययुर्निवेदितुं निशाचराणा मधिपं भयेन ॥११॥
प्रभो ! कपिः कालकरालवद्वनं प्रविश्य कार्यं शृणु यत्कृतं तत् ॥
फलानि भुंक्त्वा सुतरून्महार्णवे चोत्पाट्य चिक्षेप महावली सः ॥१२॥
निशाचरा स्तस्य वनस्यरक्षकाः सर्वेहतास्तेन महावलेन ॥
रूपं प्रभो ! तस्य करालकालवत्कालः स्वयं किं कपिरूपतोऽभ्यगात् ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाच क्काचित्प्रविलोक्यघातं निशाचराणां मतिदर्पशालिनाम् ॥
गत्वाऽन्तिकं राक्षसनायकस्य निशाचरी तत्समुवाच सर्वम् ॥१४॥
सीतायाः परितो विहाय विटपान्, येऽन्येद्रुमादूरगा-
स्तानुत्पाद्य महार्णवेऽतिबलवान् चिक्षेप सर्वान्कपिः ॥
तेनैवप्रहता ह्यशोकविपिने ये रक्षिणोराक्षसा
दृष्ट्वातान् समुपागताऽस्मि विपिनाद्वक्तुं प्रभोतेऽन्तिकम् ॥१५॥
वधायवा तस्य कपेर्ग्रहीतुं कुरुप्रयत्नं भगवन्? भवाय ॥
नचेन्नशिष्यन्ति निशाचरास्ते प्रभोऽवशिष्टाः प्लवगेन तेन ॥१६॥

इति श्रीमद्बालबोधरामायणे सुन्दरकाण्डे चतुर्थः सर्गः ॥४॥

निशम्य भग्नं विपिनं स्वकीयं महाप्रियं राक्षस नायको द्रुतम् ॥
क्रोधात्समाहूय स जम्बुमालिनं सम्प्रेषयामास वधाय तस्य ॥१॥
स जम्बुमाली प्रययौ नृपाज्ञया बलैर्वृतः क्रोधसमन्वितश्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आमात्यपुत्रो विपिनेऽतिदुर्मति र्मदोद्धतस्तत्र ददर्श वानरम् ॥२॥
महत्प्रभं स्वर्णगिरेःसमानं सुखोपविष्टं रणपण्डितञ्च ॥
विलोकयन्तं नगरंसमस्तं निशाचाराणां किल कालरूपम् ॥३॥
कपिः समालोक्य निशाचरान्ततो जगर्ज नीत्वाकरतः सत्रूक्षम् ॥
जघान रोषात्तरुणा कपिस्तं ममार सोऽन्यान्प्रममर्द मर्कटः ॥४॥ म/
पुनः पुनस्तस्य वधाय कोपादप्रेषयत्सोऽतिबलान्निशाचरान् ॥
परं हतास्ते कपिना हि तेन निशम्यततस्वस्यसुतं कुमारम् ॥५॥
अप्रेषयत्तद् गमने दशास्यः प्रोवाचवाक्यं प्रविविच्य सम्यक् ॥
शृणुष्व नाहंप्लवगं प्रमन्ये तं कर्मणा चेतसि तर्कयन्ततः ॥६॥
वपुः प्ररक्ष्याऽति प्रयत्नतस्त्वं यतो हि युद्धे विजयोऽध्रुवं तथा ॥
दृष्टामयाऽत्यन्त्यबलाः प्लवंगमा वालीहरीन्द्रः सहसोदरेण ॥७॥
नलोऽथनीलः पनसः सुखेणो मयन्दसंज्ञः खलु जाम्बवांश्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गजो गवाक्षो द्विविदश्च केशरी दधीमखोऽन्ये कपयोऽङ्गदादयः ॥८॥
परं न तेषां बलमीदृशंमया दृष्टं श्रुतं राक्षस नाशकारकम् ॥
अतः समाधाय शरीरमद्भुतं कपेर्हरिर्वा ऽञ्जजनिर्हरोऽथवा ॥९॥
समागतोऽस्मिन्नगरेऽसुराणां विनाशहेतो रितिवेद्म्यहं शृणु ॥
अतः समानेतुमतीवभीषणं कपिप्रवीरं व्रज माययाऽऽत्मज ? ॥१०॥
श्रुत्वावचस्तज्जनकस्य सद्यो नोत्त्रासहर्षंसमरस्य सर्वम् ॥
शरादिकं वाजिगजैः समावृतो रथोपविष्टः प्रघसादिभियुंतः ॥११॥
सैन्यैरसंख्यैः सहितः स संययौ वधायतद्वानरसत्तमस्य ॥
गत्वा कृतंतैः समरं प्रकृष्टं निशाचरै र्वायुसुतेन सर्वैः ॥१२॥
परं समुत्पाट्य तरुं विशालं तेनैव सर्वान्निजघेन वानरः ॥
श्रुत्वा वधंस्वस्यसुतस्य रावणो गन्तुं स्वयं तत्र समुद्यतोऽभवत् ॥१३॥
दृष्ट्वा व्रजन्तंपितरं निवार्य्यं जगाम सद्यो घननादनामकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सैन्यैरसंख्यै र्बहुवाजिकुञ्जरैः समावृतः सौम्यरथोपरिस्थः ॥१४॥
ब्रह्मास्त्रमादाय कपेःसमीपं गत्वास्थितस्तत्र दशाननात्मजः ॥
बभूव युद्धं तुमुलं तयोस्तदा लङ्कानगर्या मभवत्कोलाहलः ॥१५॥
शरैरनेकै र्मरुदात्मजस्य विव्याधगात्रेषु दशाननात्मजः ॥
ततोऽतिकोपात्पवनात्मजो रिपुं जघान नीत्वा विटपंविशालम् ॥१६॥
तरोः प्रहाराद्भवद्विसंज्ञो रथोऽपि भग्नः प्रबभूवतस्य ॥
सैन्यानिसर्वाणि ममर्द तत्र कपिर्गजादीन्मृगराजको यथा ॥१७॥
हयान्ध्वयान्कुञ्जरतोऽथकुञ्जरान् जघानसर्वान् सकपिप्रवीरः ॥
अवाप्य संज्ञां खलु रावणात्मजः पुनर्ययौ वायुसुतेन योद्धुं ॥१८॥
दृष्ट्वा कपिस्तं पुनराजगाम रणाजिरे रावणजं निहन्तुम् ॥
पुनस्तयोस्तत्र बभूव युद्धं रणाङ्गणे मारुति दैत्यपुत्रयोः ॥१९॥
कपिर्गृहीत्वा किल पादपोपलौ तथेन्द्रजिच्छायक कार्मुकेच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपिर्जघानोपलतो निशाचरं निशाचरोऽसंख्यशरैः प्लवंगमम् ॥२०॥
परं न तौ खिन्नबलौ बभूवतुर्भृक्षैरहन् वायुसुतो निशाचरम् ॥
रक्तं वमन्स समलोचयन्मया जेतुं न शक्यः खलुवानरोऽयम् ॥२१॥
ततो निबध्नामि कपिप्रवीरं ब्रह्मास्त्रपाशेन सुयत्नतो द्रुतम् ॥
ब्रह्मास्त्र मादाय स रावणात्मजो गत्वा समीपं पवनात्मजस्य ॥२२॥
चिक्षेप तद्वानरसत्तमाय बद्धः कपिश्चेतसि शोचते ऽसौ ॥
ब्रह्मास्त्रमेतद्यदि भञ्जयामि तदाभवेद्धर्मपथेऽतिहानिः ॥२३॥
अतोनिबद्धः खलु सौम्यपाशाद्व्रजामि लङ्काधिपतेः समीपम् ॥
करोम्यहं समायिकीं सुवार्तां दशाननाच्चेति विविच्यवानरः ॥२४॥
ब्रह्मास्त्र बद्धः पवनात्मजोहरि निशाचरैश्चातिबलैर्गृहीतः ॥
ययौ सभायां दशकन्धरस्य विहङ्गराजः फणि संहतो यथा ॥२५॥

इति श्रीमद्बाल बोध रामायणे सुन्दर काण्डे पञ्चमः सर्गः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वद्धः कपिश्चेति निशम्य सर्वे ययुर्द्रुतं तत्र दिदृक्षवोऽसुराः ॥
निहन्यतांकोपि विभक्ष्यतांपरे सन्दह्यतां खल्विति ते ब्रुवन्तः ॥१॥
दशाननस्तम्प्रददर्श वानरं महाबलं राक्षसनीयमानम् ॥
पृष्टस्ततो राक्षसनायकाज्ञया प्रहस्तसंज्ञेन सुमन्त्रिणाकपिः ॥२॥
कस्त्वं कपे ! कार्यमिहास्ति किन्ते समागतः केन वदस्व प्रेषितः ॥
भयंन तेऽत्रास्तु वदस्व सत्यं त्वामत्र पाशेन विमोचयामि ॥३॥
वनंकिमर्थं सकलंविनाशितं हताः कथं मेऽतिबलानिशाचराः ॥
उवाच हर्षात्पवनात्मजोरिपुं विलोक्य लोकत्रयकन्टकासुरम् ॥४॥
शृणुष्वतत् तद्रघुनायकस्य दूतोऽस्मि यस्याखिलनायकस्य ॥
विहृत्य भार्यां प्रकरोषि चोद्यमं विनाशहेतोः स्वयमेव रावण ! ॥५॥
स राघवः प्राप्य गिरिं मतंगं चकार सख्यं कपिनायकेन ॥
बाणेन चैकेन निहत्य वालिनं राज्यं स्वमित्राय ददौ कपीनाम् ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स वानराणामधिपो महाबली सलक्ष्मणः सम्प्रति रामरक्षितः ॥
प्रवर्षणे तिष्ठति सोह्यसंख्यैः सैन्यैः समेतोऽतिमुदा कपीन्द्रः ॥७॥
करोति कार्याणि सएव तस्य रामस्य सर्वाणि निशाचरेश्वर ! ॥
सम्प्रेषितास्तेन कपीश्वरेण विदेहपुत्रीं परितः सुमार्गणे ॥८॥
दूताश्च तस्मात्कपिपुञ्जतोऽहं सीतांविचिन्वन् कपिरागतोऽस्मि ॥
दृष्टामया शोकसमन्विता सा सीताह्यशोकस्य तरोस्तले स्थिता ॥९॥
कपिस्वभावेन वनंविनाशितं बुभुक्षितेनातिशयेन तत्र ॥
दृष्ट्वा ततोमां धृतचापशायकाः निहन्तुकामा ममसन्निधौयै ॥१०॥
समागतास्ते निहता मयैव प्रियंस्वदेहं खलु देहिनां यतः ॥
ततो निबद्ध्यात्र समागमन्मां ब्रह्मास्त्रतोऽसौ तवमेघनादः ॥११॥
कृतामया नास्य . विभञ्जनेमतिर्यतो भवेद्धर्म्मे पथेऽतिहानिः ॥
तथापि बद्धः समुपागतस्ते हितं प्रवक्तुं शृणु मे वचस्त्विदम् ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहायसेवां रघुनन्दनस्याऽभवद्धितं कस्य विमृश्य पश्य ॥
कृतंत्वया ऽज्ञानतया कुवृत्त मितःपरं सेवय पादपद्मम् ॥१३॥
रामस्यसत्यं प्रभवेद्धितन्ते विसृज्यबुद्धिं खलु राक्षसीं त्वम् ॥
समुद्भवस्ते ऽम्बुजजन्मनः कुले कुबेरबन्धु र्निपुणस्त्रयीषु ॥१५॥
वलैर्गृहीताश्च दिशाधिपास्त्वया वनाद्विनीता किमु लोकमाता ॥
विसृज्य मौर्ख्यं किल बान्धवैर्युतः सीताम्पुरस्कृत्य मयैवसार्द्धम् ॥१६॥
व्रजस्वरामं प्रणतार्तिहारिणं त्राहीति वाक्यं प्रलपँस्त्वमद्य ॥
क्षमिष्यते त्वां नियमेन राघवो दयानिधिः सत्यमवेहि रावण ! ॥१७॥

इति श्रीमद्बालबोध रामायणे सुन्दरकाण्डे षष्ठः सर्गः ॥६॥

श्रुत्वाऽमृतास्वाद समानभाषितं दशाननो वायुसुतं जगाद ॥
संशासितं तद्भुवनत्रयं भोः त्वंमां प्रशिक्षन्न कथं विलज्जसे ॥१॥
त्वामद्य हत्वा जनकात्मजां ततो निहत्यपश्चात्कपिनायकं ध्रुवम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलैर्युतं तं विनिहत्य संगरे रामं सबन्धुं प्रणिहन्म्यहन्ततः ॥२॥
वाक्यं समाकर्ण्य दशाननस्य कोपादिदं मारुति रब्रवीत्तम् ॥
बद्धोयतस्त्वं किल कालपाशा दतोहितं न प्रशृणोषि धिक्त्वाम् ॥३॥
रामो विभुस्ते निधनाय निश्चयं चकार तेनैव नवुध्यते त्वया ॥
करिष्यते ते निधनं सुनिश्चितं रामस्यवाक्यं कथमन्यथास्यात् ॥४॥
श्रुत्वावचस्तन्मरुदात्मजस्य दशाननो राक्षसमेक मब्रवीत् ॥
खड्गेनतीक्ष्णेन निहन्यतां कपिर्निवारयामास ततो विभीषणः ॥५॥
हतेऽत्रदूते खलु राघवाय निवेदयेत्को जनकात्मजायाः ॥
वार्ताञ्च रामेण भवेत्कथन्तत् युद्धं यदुद्दिश्य विदेहजाहृता ॥६॥
अतोऽस्य देहे क्रियतां सुचिन्हं वधैनतुल्यं समुवाच सोदरः ॥
वाक्यं समाकर्ण्य विभीषणस्य दधारशान्तिं रजनोचराधिपः ॥७॥
विविच्य मन्त्रं निजमन्त्रिवर्गैं राज्ञापयामास निशाचरानिदम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुच्छेऽस्यवस्त्रैर्घृततैलसिक्तै र्निशाचरा वेष्टयतार मस्य ॥८॥
आज्ञां समादाय दशाननस्य निशाचरा स्तत्करणे प्रवृत्ताः ॥
विवर्धयामास कपिः स्वपुच्छं यतोन शेषोनगरेऽम्बरस्य ॥९॥
नासीत्तथा तैलघृतावशेषश्चैतत् समाश्रुत्य दशाननोऽवदत् ॥
पुच्छस्यचाग्रे खलु पावकं कपेः प्रज्वाल्य सन्दीपय मे ऽनुशासनैः ॥१०॥
सम्भ्राम्य पुर्यां परितोऽस्य सद्यो विसृज्यतां गच्छतु वानरोयम् ॥
वाक्यंसमाकर्ण्य दशाननस्य पुच्छेऽस्यवह्निं समदीपयद्द्रुतम् ॥११॥
धृत्वाचपाशं वलिनोमहाऽसुरागताः परिभ्रामयितुं समन्ततः ॥
निशाचरास्तत्र निवासिनः कपेर्वद्धं पटैः पावकतः प्रदीप्तम् ॥१२॥
पुच्छंसमालोक्य ययुर्निहन्तुं मुष्ट्यातथा पादतलैश्च दण्डैः ॥
चोरोऽयमित्येव विभाषयन्तो निशाचरास्ते ऽतिमुदं प्रपेदिरे ॥१३॥

इति श्रीमद्वालबोधरामायणे सुन्दरकाण्डे सप्तमः सर्गः ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वद्धो वायुसुतः स राक्षसगणै राकर्षितो रज्जुभिः
प्राप्तश्चोप वनान्तिकं कपिवरो यत्रास्ति सीताऽमला ॥
दृष्ट्वा तं समुपागता निशिचरीह्येका ऽतिमोदान्विता
सर्वासां समुवाच दुःखमखिलं श्रीवायुपुत्रस्यतत् ॥१॥
उवाच सीतामपि राक्षसी सा सम्पश्य सीतेऽद्य हरिर्निवद्धः ॥
कृतंत्वयायेन सुसम्विदं पुरा स साम्प्रतं राक्षसताड्यमानः ॥२॥
श्रुत्वेति सम्वीक्ष्य दशांकपेस्ताच्चिरं रुदित्वा समुवाच शोकात् ॥
हाहन्त दुःखं ममराघवाय निवेदयेत्कोऽत्र कपिर्गृहीतः ॥३॥
विविच्य वह्निं समुवाचसीता यद्यस्ति मे रामपदेऽतिप्रीतिः ॥
चेद्भाग्यशेषश्च ममास्तिवह्ने ! हनूमदङ्गे भवशीतलस्तदा ॥४॥
वायोःसखित्वं यदितेऽस्ति वह्ने ! कपिः सुतोऽयं यदि मारुतस्य ॥
प्रियस्य मेऽयं यदिशिष्टदूतो हनूमदङ्गे भवशीतलस्तदा ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्येव वह्निं परिवन्द्य सीता जगाम रामं मनसा मनस्विनी ॥
व्यचिन्तयत्तत्र कपिश्च पुच्छं हुताशनो मे न कथं प्रधक्ष्यति ॥६॥
देद्विप्यमानोऽतिशयेन पावकः करोतिपीड़ांन कथं ममाङ्गे ॥
तापोन किञ्चित् परिवुद्ध्यते मया विभावसोर्भा हिमवत्कथंमाम् ॥७॥
सर्वंहि रामस्य प्रभावतस्त्विदं नचेत्कथं मांलवणार्णवस्य ॥
मध्येप्रयान्तं समुपागतोऽद्रि· र्विश्रामहेतोर्मम केनहेतुना ॥८॥
विविच्य चित्ते हरिसत्तमस्त्विदं श्नेहान्मुहुस्तं प्रणिपत्यचेतसा ॥
जगाम हर्षं हरिनायकः परं कार्यं पुनः सोऽन्यतमं व्यचिन्तयत् ॥९॥
एवं कपिस्तस्य पुरोहि पश्चिमां दिशां समासाद्य वभूव सूक्ष्मः ॥
सद्योविनिर्गत्य विरञ्चिपाशा दुत्प्लुत्य हर्म्योपरि चारुरोह ॥१०॥
पुनःशरीरं प्रविधाय भीमं निशाचराणां भयदायकन्तत् ॥
जगर्ज हर्म्योपरि वानरेन्द्रो वभूव नादः पविपाततोऽधिकः ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपिस्तदा तत्र निशाचराणां ददाह सर्वाणि निकेतनानि ॥
विलोक्य दीप्तानि गृहाणि पुर्यां मरुद्गणास्तत्र भयानकस्वनैः ॥१२॥
प्रवान्ति मित्रस्य सहायहेतो लङ्कां समासाद्य तदैव वेगैः ॥
हा नाथ ? तातेति तथास्ववान्थवा नुच्चार्य सर्वाः प्ररुदन्तिनार्यः ॥१३॥
निशाचरास्तत्र निवासिनोये पश्यन्ति दीप्तानि गृहाणि सर्वे ॥
कुर्वन्ति कार्याणिन तस्य शान्तये लङ्कास्थिता यद्यपि वारिधेस्तटे ॥१४॥
इतः परं मन्दिरतश्च मन्दिरं प्रोत्प्लुत्य प्रोत्प्लुत्य ददाह सर्वम् ॥
गृहं परं चैक विभीषणस्य त्यक्त्वा स सर्वं कृतवान्हि भस्म ॥१५॥
प्रोत्प्लुत्य सिन्धौ प्रपपात पुच्छं हिमंज्ञयित्वा प्रबभूव हृष्टः ॥
वायोःसखित्वेनच भूसुतायाः शुभाशिषाच्चापि तथैव मारुतिम् ॥१६॥
रामस्य विज्ञाय विशिष्ट दूतं ददाह पुच्छं न हुताशनोऽस्य ॥
ततो हनूमानतिहर्षतो द्रुतं सीतां समासाद्य ननाम पादौ ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुद्रपारं प्रतिगन्तु कामं समीक्ष्य सीता प्ररुरोद मारुतिम् ॥
पुनः स सीतां बहुभिः सुवाक्यैः सम्बोध्य ततुं लवणाम्बुधेर्जलम् ॥१८॥
जगाम सद्यः सुनगस्यमूर्धनि स्थितोहरिः सौम्यदिशां प्रपश्यन् ॥
कृत्वाऽतिनादं पवनात्मजस्तदा प्रोत्प्लुत्य तस्मादिगरितोहि सौम्याम् ॥१९॥
दिशांजगामाशु हरिः प्रवेगैः स्मरन्यदाब्जं रघुनायकस्य ॥
निशम्य शब्दं मरुदात्मजस्य निशाचरास्तस्य पुरोनिवासिनः ॥२०॥
भूमौनिपेतुः करयुग्मतः श्रुतिः संछाद्य वज्रस्य निपातशंकया ॥
तथा सगर्भाह्यभवन्विगर्भाः स्वनंसमाकर्ण्य कपीश्वरस्य ॥२१॥
विलोक्य सर्वेकपयो ऽनिलात्मजं समाव्रजन्तं गगनेऽतिकौतुकात् ॥
वदन्ति ते सिन्धुतटे परस्परं दृष्टा विदेहस्य सुता हनूमता ॥२२॥
एवंहनूमान् गगनान्महीतले समागतः सिन्धुतटेऽतिसौम्ये ॥
यत्रस्थितास्ते कपयोऽङ्गदादयो ब्रुवन्वचोऽत्यन्त सुखेनवानरान् ॥२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टामया पद्मपलाशलोचना सीताह्यशोकस्य तरोस्तलेस्थिता ॥
दग्धामया स्वर्णमयी पुरी सा विनाशितास्तस्य चमूगणाश्च ॥२४॥
अशोकसंज्ञं विपिनं समग्र्यं विध्वंस्य पुत्रञ्च दशाननस्य ॥
निहत्य सम्भाष्यदशाननेन सीतां समास्वास्य समागतोऽहम् ॥२५॥

इति श्रीमद्बालबोध रामायणे सुन्दरकाण्डे ष्टमः सर्गः ॥८॥

श्रुत्वावचस्तन्मरुदात्मजस्य सर्वेवभूवुर्मुदिताः प्लवंगाः ॥
पुरः प्रनृत्यन्ति प्लवंगमास्ते चुम्बन्ति गात्राणि तथैव मारुतेः ॥१॥
गत्वा महेन्द्राख्य गिरेःप्रमूर्धनि स्थिताः कपीन्द्राः परिहृष्टमानसाः ॥
वद्धाञ्जलिस्ते पुरतो हनूमतः संश्रोतुकामा उदधेः प्रलंघनम् ॥२॥
सन्दर्शनं चापि विदेहजायास्तथा ऽसुराणां समरेपराजयम् ॥
प्रदीपनं राक्षसनायकस्य पुरो विनाशं विपिनस्यसर्वम् ॥३॥
उवाच तारातनयोऽ निलात्मजं कथं समुद्रं प्रततार दुस्तरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वाकृतं यद्धदतत्समस्तं सखे ? शुभं कर्णसुखप्रदायकम् ॥४॥
त्वमेकवीरः किल प्राणरक्षकः सत्यम्त्वभूत्वाद्य हरीश्वराणाम् ॥
गत्वाऽब्धिपारं जनकात्मजायाः वार्तां समादाय समागतोऽतः ॥५॥

प्लवगवरसमूहैर्वन्द्यमानः स तत्र
गिरिवर शिखरस्थः स्वर्णवर्णः प्रसन्नः
परमकठिन कृत्यं सच्चरित्रं स्वकीयं
कथयितुमतिप्रेम्णा प्रोद्यतो वायुपुत्रः ॥६॥

सिन्धूपरिष्टाद्गगने प्रगच्छता मार्गे कृतंयत् सुरसाख्यया तत् ॥
मैनाकसंज्ञेन धराधरेण तोयाद्विनिर्गत्य यथाऽऽदृतः स्वयम् ॥७॥
पुनर्जलेऽत्यन्तविशाल विक्रमा निशाचरी यत्प्रचकार कार्यम् ॥
सा सिंहिका स्वस्य कराद्यथाहता जलौघमध्ये लवणार्णवस्य ॥८॥
अथोदधेः पारमवेत्य तस्माद्यथा दिनान्ते नगरम्प्रदृष्टम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सायं स्वयं सूक्ष्मतरं तनुं यथा कृत्वा ययौ रावणराजधान्याम् ॥९॥
निशाचरीतः परिभर्त्सितोयथा यथाकरात्स्वस्य च साविमूर्च्छिता ॥
ततः स्वयं तन्नगरे निशायां यथाकृतं सम्भ्रमणं गृहेगृहे ॥१०॥
दशाननस्यापि गृहे प्रविष्टो यथाविचिन्वञ्जनकात्जांताम् ॥
सीतामनालोक्य विचिन्तितोयथा स्मृत्याच तस्माद्वचनं खगस्य ॥११॥
यथाह्यशोके विपिने प्रविष्टो यथाप्रदृष्टा जनकात्मजाच ॥
दशाननस्तत्र यथासमागतः स्वयं यथावृक्षदलान्तरे स्थितः ॥१२॥
दशाननो भूमिसुतां यदब्रवीद्विदेहजा यत्समुवाच रावणम् ॥
निशाचरीणां परितर्जनैर्यया रुरोदसीताऽतिविलापतस्तत् ॥१३॥
सीता स्वहस्ताभरणस्य निश्चयं यथाकृतं तां समुवाच यत्स्वयम् ॥
यथाच वार्ता समभूत्तयापुन र्यथाकृतश्चोपवनस्य नाशः ॥१४॥
निशाचराणां निधनं रणेयथा यथादशास्यस्य सुतंममार ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाऽभवत्स्वस्यचवन्धनं तत्प्रभाषणं रावणतो यथाऽभवत् ॥१५॥
ततः प्रचण्डानलतः प्रदीप्ता पुरीसमग्रा दशकन्धरस्य ॥
पपात प्रोत्प्लुत्य महार्णवेयथा निर्वाप्य वह्निं च यथाप्रहृष्टः ॥१६॥
सीतां समासाद्य पुनः प्रणामं प्रयाणकालेऽपि यथा चकार ॥
समुद्रपारं प्रतिगन्तु काम मावीक्ष्य सा साश्रुमुखी यथाऽभवत् ॥१७॥
पुनःपुनस्तां परिवोध्य वारिधेर्जलं समुल्लंघ्य यथाऽऽगतःस्वयम् ॥
सर्वं स्वकृत्यं प्रणतान्प्लवंगमानुवाच हर्षैर्हनुमान्महाहरिः ॥१८॥
श्रीरामचन्द्रस्य प्रसादतस्तथा सत्तेजसा तद्भवतामनुष्ठितम् ॥
सर्वं मयातत्र कृतं न यत्तद्धिविच्य सर्वं क्रियतामुवाच च ॥१९॥
वाक्यंसमाकर्ण्य मरुत्सुतस्य हर्यृक्षपास्ते जहृषुर्महावलाः ॥
नगाग्रगं कोटिदिवाकरद्युतिं तं वायुपुत्रं प्रणमन्ति वानराः ॥२०॥

इति श्रीमद्बालबोध रामायणे सुन्दरकाण्डे नवमः सर्गः ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरोनिधायाथ मरुत्सुतं कपिं सम्प्रस्थितास्ते ऽतिमुदा प्रवर्षणम् ॥
मार्गेसमासाद्य कपीश्वरस्य सुरक्षिते पक्वफलैः समन्विते ॥१॥
वनेप्रविश्याशु मुदाप्रभक्षणं कुर्युस्त्वनादृत्य वनस्यरक्षकान् ॥
ततश्चते ऽमर्षयुताः प्ररक्षिणो ययुर्द्रुतंवानरराजसन्निधौ ॥२॥
गत्वा समूचुर्नृपतिं प्ररक्षिणः प्रभो ! कुमारानुमतेन वानराः ॥
प्रविश्य तेऽत्यन्तसुरक्षितं वनं भुञ्जन्ति वृक्षस्य फलानि ते बलात् ॥३॥
श्रुत्वाकपीशः समुवाचरामं दृष्टाप्रभो ! भूमिसुताऽद्य वानरैः ॥
तत्रापि वायोस्तनयेन निश्चयं यतः प्रखादन्ति फलानि वानराः ॥४॥
सीतां नदृष्ट्वा विपिने प्रभो ! मे नैकोऽपिगन्तुं प्रभवेत्समर्थः ॥
अतश्च भूमेस्तनयाऽद्यदृष्टा हनूमता सत्यमवेहि राघव ! ॥५॥
श्रुत्वावचस्तत्कपिनायकस्य हृष्टोवभूवातिशयेन सानुजः ॥
कपीश्वरतस्य वनस्यरक्षकान् दधीमुखादीनिदमाह सर्वान् ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्ररक्षिणो नैव भयं कुरुध्वं प्रहृष्ट एवास्मि वनप्रधर्षणैः ॥
सम्प्रेषयध्वं मम सन्निधौतान् श्रुत्वेतिवाक्यं प्रययुस्ततस्ते ॥७॥
गत्वा च ते तत्रकुमारमङ्गदं हनूमदादीनिदमुक्तवन्तः ॥
पूर्वोक्त वाक्यानि विसृज्य सर्वे संगम्यतां वानरराज सन्निधौ ॥८॥
श्रुत्वा युयुस्ते प्लवगोत्तमा द्रुतं कृत्वापुरो वायुसुतं प्रहर्षैः ॥
आकाशमार्गात्परिवर्षमाना प्रमेघमालेव प्रवर्षणाद्रौ ॥९॥
गत्वाप्रणेमुः पद्‌योः ससोदरं रामं तथा तत्र कपीश्वरञ्च ॥
आज्ञां समादाय रघूत्तमस्य,, उपाविशुस्ते रघुनायकान्तिके ॥१०॥
प्रहृष्टचेताः प्रविलोकयन्तः प्लवंगमा रामपदारविन्दौ ॥
विलोक्यरामोऽप्यति हर्षयुक्तान् कपिप्रवीरान् परिपृच्छतीदम् ॥११॥

हे हे वानरनायकाः कथयत सर्वेहिमेजानकी
दृष्टावेति नवेति साम्प्रतमिमां वार्तां प्रियायाः शुभाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वा रामपुरः स वायुतनयो वद्धाञ्जलिर्भक्तितो
दृष्टा भूमिसुतेति वाचमखिलां वक्तुं समर्थोऽभवत् ॥१२॥
सिन्धोर्याम्यतटेऽस्ति नाथ ? शुभगः शैलस्त्रिकूटाभिधो
यन्मूर्धा वहुयोजनेषु विततस्तत्रास्ति लङ्कापुरी ॥
भूमिः स्वर्णमयी च तत्र विपिनोद्यानानि वेश्मानिच
वीरैश्चाति भयंकरैः परिवृता संख्याधिकैः सा प्रभो ? ॥१३॥
तस्मिन् सौम्यपुरेऽति सूक्ष्मवपुषा यत्नात्प्रविश्य प्रभो ?
चिन्वन्भूमिसुतां ययौनृपगृहं तत्राप्यनालोक्य ताम् ॥
सम्पातेर्वचनैरशोकविपिने सम्प्रस्थितोऽहं तदा
दृष्टाभूमिसुता मयाऽश्रुनयना दैत्याङ्गनाभिर्वृता ॥१४॥
सीता शोकसमाकुला शृणु प्रभो ! पत्रान्तराद्वीक्षिता
सर्वांते विपिनस्य कीर्तिरमला संश्राविताप्रस्फुटम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वालीनिग्रहणं यथाहरिपतिः सुग्रीवनामाऽभवत्
सीतांमार्गयितुं तथाच वहवः सम्प्रेषिता वानराः ॥१५॥
तस्माद्वानरयूथपात्कपिरहं प्राप्तो यथा तत्पुरे
उक्तञ्चेति प्रयामि रामनिकटे नेतुं सशेषं विभुम् ॥
श्रुत्वामेवचनं विलोक्यपरितः प्रोवाच सा मामिदं
येनैषा ममकर्णकोमलकथा चोक्ता स दृश्योभव ॥१६॥
वैदेह्यावचनं निशम्य भगवन् ! पत्रान्तरात्सत्वरं
गत्वा भूमिसुतान्तिकं जनकजां नत्वाऽथ तेमुद्रिकाम् ॥
तस्यै सम्प्रददौ विलोक्य लिखितं सा रामनामेति च
निःक्षिप्योरसि तां रुरोद जननी विश्वस्य मामग्रतः ॥१७॥
श्रुत्वेदंपरिरोदनञ्च सकलां दृष्ट्वा तदीयां दशां
धृत्वाऽहं धृतिमम्बुजाक्ष ! कियता कालेन सीतामपि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्बोध्यात्र समागतोहि भगवन्! नीत्वाच चूड़ामणिं
विश्वासायतवैव तेन विमलश्चूड़ामणिर्गृह्यताम् ॥१८॥
नीत्वा तं स्वकरेण वायुसुततश्चूड़ामणिं राघवः
स्वान्तेस्वे विनियोज्य साश्रुनयनो वातात्मजं पृच्छति ॥
रूपंतस्य पुरो निशामय कपे? कीदृक् स्थितिश्चेति मां
श्रुत्वाऽहं प्रकरोमि मन्त्रिगणतः सम्यग्विचारं ततः ॥१९॥
स्वर्गे नैव रसातलेनं भुविवा दृष्टं श्रुतं नैवच
रूपं पूर्णवलं सुशोभनगृहं लङ्कास्थितं तन्मया ॥
एवं सत्यपि नाथ? तस्यसकलं ग्रामं प्रदग्ध्याऽक्षयं
हत्वा वीरगणान्प्रमथ्य सकलान्प्राप्तः प्रभो? तेऽन्तिकम् ॥२०॥
धन्यस्त्वं न समोऽस्ति यस्य भुवने भूतोन वासम्भवेत्
यस्मात्सिन्धुमतीत्य काञ्चनपुरीलङ्का प्रधर्ष्यामताम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हत्वारावणजं विदेहतनयावार्तां समादाय च
प्राप्तो मेनिकटे ततोनभुवने वीरः कपे ? त्वत्समः ॥२१॥
त्वन्नामस्मरणात् प्रभोऽत्रमनुजाः प्राणप्रयाणेऽपिच
संसाराब्धिमपारमेत्य सुगमात्पारं परं यान्त्यथ ॥
किन्तावत्तव शासनाद्यदि विभो ? नोत्वाहि ते मुद्रिकां
अब्धेः कूर्दनतत्परः कपिरहं पारं ययौ किं ययौ ॥२२॥
रामो राजमणिर्विमृश्य सकलं वातात्मजंवानरं
वाहुभ्यां परिगृह्य वक्षसि ततो नीत्वा ऽवदत्प्रेमतः ॥
श्रुत्वाऽहं तवसाहसञ्च सकलं वीरत्वमुग्रन्तथा
स्मृत्वा किम्प्रददामि ते शृणुकपे ! नैवास्तिलोकत्रये ॥२३॥
श्रुत्वारामविभाषितं हि मरुतःपुत्रोऽतिहर्षान्वितो
रामंप्राह किमस्तिनाथ ! भुवने संस्पर्शनात्तेऽधिकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोचेनैव जगत्त्रयेऽपि मनसा दृष्ट्व्यातथा हेप्रभो !
धन्योऽहं परिरम्भणेन भवतः सर्वेषु लोकेषुच ॥२४॥

इति श्रीमद्बालबोधरामायणे सुन्दर काण्डे दशमः सर्गः ॥१०॥

॥ इति सुन्दरकाण्डं समाप्तम् ॥

॥*॥ अथयुद्धकाण्डम् ॥*॥

अग्रे मारुतनन्दनं सविनयं नीत्वागदां भीषणां
पाणिभ्यां मकरन्दरञ्जित पदं धृत्वास्थितो यस्यच ॥
पार्श्वे बन्धुकपीश्वरौच परितो हर्यृक्षयोर्नायकाः
सेवन्ते तमहं प्रणम्यचरितं युद्धस्य वक्ष्येस्फुटम् ॥१॥

मरुत्सुतात्सर्वं मतीवध्यानाद्विबुध्य रामोऽथ कपीश्वरम्प्रति ॥
उवाच हर्षेण हनूमतायत् कार्यंकृतं तन्न भवेद्धिचान्यैः ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुःशतक्रोशमितं समुद्रं कोलंघयेद्वायुसुतं विनाऽन्यः ॥
लङ्कांसुगुप्तां रजनीचरैःसदा नधर्षितुं कोऽपि भवेत्समर्थः ॥३॥
हनूमतेदं विहितं समस्तं कार्यं ततश्चास्य समोऽत्र लोके ॥
सखेन भूतो न भविष्यति ध्रुवं कालेऽथवाऽस्मिन्नहि वर्ततेभुवि ॥४॥
स्मृत्वा समुद्रं मनसाऽत्रमेमनो विदीर्यते नक्रभषादिसंकुलम् ॥
समुद्रमुल्लंघ्य निहत्य रावणं सीतांहि तस्मात्कथमानयामि ॥५॥
श्रुत्वावचः श्रीरघुनन्दनस्य कपीश्वरो राममिदस्वभाषे ॥
समुद्रमुल्लंघ्य झषैश्च नक्रैर्युतं हनिष्यामि निशाचराधिपम् ॥६॥
त्यजस्व चिन्तामिहराम ? सत्यं चिन्तायतः कार्यविनाशिनी सदा ॥
प्रपश्य चैतानि बलान्वितानि सैन्यानि तिष्ठन्ति हितायतेऽत्र ॥७॥
कुरुष्वबुद्धिं तरणोऽर्णवस्य ततोजयो रावणतो भवेद्ध्रुवम् ॥
धनुर्धृं तस्याभिमुखेन कोपि तिष्ठेद्यतो राम ? पुरत्रये ते ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वावचस्तत्कपिनायकस्य भक्त्यान्वितं वीर्यसमन्वितञ्च ॥
स्वीकृत्य रामः परिपृच्छतीदं मरुत्सुतं बुद्धिमताम्वरिष्ठम् ॥९॥
कपे ? स्वरूपं प्रवदस्व तस्य पुरोऽस्यसर्वांहि पुनःस्थितिञ्च ॥
ज्ञात्वा विचारं प्रकरोमि तस्य यथाभवेन्नोऽरिगणे जयोद्रुतम् ॥१०॥
श्रुत्वा वचस्तद्रघुनन्दनस्य मरुत्सुतः साञ्जलिरावभाषे ॥
लङ्का स्थिता मूर्धनि पर्वतस्य त्रिकूटसंज्ञस्य महोत्सवान्विता ॥११॥
भूमिः सुवर्णस्यच मन्दिराणि माणिक्य मुक्ताफल निर्मितानि ॥
तथाच नानोपवनानि सन्ति मृगैर्विहंगैः परिशोभितानि ॥१२॥
वापीतडागै र्विमलोदकैः शुभै र्विराजिता न्यम्बुरुहैश्चहंसैः ॥
गृहाणि सर्वाणि सुरञ्जितानि स्तम्भैर्विचित्रैः परिशोभितानि ॥१३॥
दृष्टानि सर्वत्र मयाऽ तिरम्ये लङ्का पुरेनाथ ? तवानुकम्पया ॥
प्रभो ? प्रतीच्यां दिशिसम्प्रदृष्टं गजावलीभिः परिशोभितंस्थलम् ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथोत्तरे वाजिगणैर्विराजितं स्थानं सुसैन्यैः परिराजितञ्च ॥
तथाऽर्बुदं द्वित्रिगुणं प्रदृष्टं निशाचराणामपिपूर्वयाम्ययोः ॥१५॥
मध्येस्थितास्तत्र गजाश्ववाहा रथादयोऽन्ये परिशोभिताश्च ॥
नानाविधैः संक्रमणैः सुशोभिता लङ्का शतघ्नीभिरतीवरञ्जिता ॥१६॥
स्थितेऽपिचैवंशृणुदेव ? मेकृतं वलस्यतुर्यांशमहं ननाश ॥
तथाशतघ्नीः खलुसंक्रमादि सुवर्णवेश्मान्यपि सं ननाश ॥१७॥
तरून्समुत्पाद्य निहत्यतत्सुतं दग्ध्वापुरं राक्षसनायकेन ॥
विभाष्यसीताम्परिवोध्यतेऽन्तिकं समागतोऽहं व्रजनाथ ? शीघ्रम् ॥१८॥
वीरैरसंख्यैः खलुभालुवानरैर्धृतः प्रभो ? रावणतः प्रयोद्धुम् ॥
वाक्यंसमाकर्ण्य मरुत्सुतस्य रामोऽवभाषे कपिनायकम्प्रति ॥१९॥

इति श्रीमद्वालबोधरामायणे युद्धकाण्डे प्रथमः सर्गः ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सखे ? स्वसैन्यानि निवेदयत्वं शीघ्रं प्रगन्तुं लवणाम्बुधेस्तटम् ॥
अहं समारुह्य मरुत्सुतस्य स्कन्धेऽनुजोमे युवराजकस्य ॥१॥
तथाच सर्वैनन्तु भालुवानरा व्योम्नः प्रगच्छन्तु सखेऽधुनैव ॥
मयासहत्वं व्रज वर्ततेस्मिन् कालेमुहूर्तो विजयस्यशोभनः ॥२॥
गजो गवाक्षो द्विविदश्च मैंदो नीलो नलो भालुपतिः सुखेणः ॥
दधीमुखो केशरि पृथपादयो व्रजन्तु सर्वे सहकैनिचैर्द्रुतः ॥३॥
एवंसमाज्ञाप्य हरीश्वरंहरिः सम्प्रस्थितः सानुज सैनिकैर्वृतः ॥
मित्रेणसार्द्धं खलुसैन्यमध्ये रराज देवेषु यथा सुरेन्द्रः ॥४॥
सर्वेसमास्तत्र सुमत्तदन्तिनो जग्मुश्चते याम्यदिशां सरोषाः ॥
सर्वे ब्रुवन्तः खलुरामसन्निधावहं हनिष्यामि निशाचराधिपम् ॥५॥
एवंहरिभ्यां किलराघवौद्धौ समुह्यमानौ गगने सुशोभतुः ॥
व्योमान्तरे वायुत उह्यमानौ प्रदीपितौ सूर्यनिशाकराविव ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिशामभिव्याप्य ययुः प्लवंगाः क्षाराम्बुधेः सौम्यतटान्तिकेच ॥
सेनांसमावेश्य कपीश्वरस्ततो जगाम रामस्य पुनः समीपम् ॥७॥
दशाननः स्वनगरे विचारं करोति चाहूय जनान्स्वकीयान् ॥
दृष्टोभवद्भि र्मरुदात्मजस्य पराक्रमो राक्षसनाशकारकः ॥८॥
प्रधर्ष्य वेस्मानि निहत्य मेसुतं दग्ध्वापुरं सन्मनसापुनर्ययौ ॥
समागता वानरभालुनायका महाबला पर्वतवृक्षयोधिनः ॥९॥
स्थिताश्च ते सौम्यतटेऽर्णवस्य करोम्यहंकिं प्रवदन्तु सर्वे ॥
मतैकतामेत्य विविच्य सर्वे कुर्वन्तुकार्याणि समृद्धये मे ॥१०॥
श्रुत्वावचस्तदशकन्धरस्य विहस्य वाक्यं प्रवदन्ति राक्षसाः ॥
प्रभो ? प्रतापस्तव सर्वतोऽधिकः प्रवर्ततेऽस्मिन्नसमये पुरत्रये ॥११॥
ततो न भीतिस्तव सम्भविष्यति प्रभो ? नरैर्वानरभल्लुकैश्च ॥
हनूमता यद्विहितं हिकार्य मुपेक्षितं तत्समयेऽस्मदादिभिः ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहर्षंतस्तेन गतोऽन्यथाकथमितः पुरो जीवितएवयास्यति ॥
भक्ष्याहिसर्वे नरवानरादयो निशाचराणामिह मा विभैषीः ॥१३॥
बुभुक्षिताश्चात्र निशाचरास्ते तेनैव सत्यं विधिना दयाकृता ॥
खादन्तुगत्वाऽत्र तटेऽर्णवस्य तवाज्ञया वानरभल्लुकादीन् ॥१४॥
वाक्यंसमाकर्ण्य निशाचराणां विभीषणो वाक्यमिदम्बभाषे ॥
भ्रातर्नकिं तत्समये निशाचरा बुभुक्षिताश्चैक कपेःसमागमे ॥१५॥
निकुम्भकुम्भामरजित्सुमालिन स्तथाच कुम्भश्रवणादयोऽन्ये ॥
रामान्नजेतुं समरेसमर्था स्ततः प्रयच्छाशु रघूत्तमायताम् ॥१६॥
यावन्न रामस्य शराभिभूता निशाचरास्तेऽत्र भवन्तिराजन् ? ॥
तदन्तरे तेन कुरुष्व सन्धिं प्रभो ? प्रयत्नाद्रघुनन्दनेन ॥१७॥
नरो न रामो मनुजावतारः सम्प्रार्थना दब्जजनैर्बभूव ॥
नाशाय ते तेन विदेहकन्यकां रामाय सम्प्रेषय नाथ ? सत्वरम् ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वाऽमृतास्वाद समानभाषितं दशाननोऽ मर्षयुतोवभाषे ॥
संगच्छ दुष्टाद्य पुरोममाशु रामाद्गृहीत्वा किमु भाषसेऽधम ? ॥१९॥
इत्युक्त्वा प्रजघानवक्षसि ततो पादेन तं रावणो
धृत्वातत् करयुग्मकेन विनयाद्भ्रातुः पदं भीषणः ॥
प्रोवाचेति सुखीभवाग्रज ? चिरं यास्याम्यहं सन्निधौ
रामस्यैव सुखाप्तयेऽत्र भुवने मोक्षाय सत्यम्परे ॥२०॥

इति श्रीमद्बालबोध रामायणे युद्धकाण्डे द्वितीयः सर्गः ॥२॥

उक्त्वेति रामाय ययौ विभीषणो मन्त्र्यान्वितस्तन्नगराद्धि सद्यः ॥
रथेसमारुह्य समन्त्रिणारुदन् प्राप्तः स रामस्यदले विहायसा ॥१॥
सम्वीक्ष्य संगृह्य वीभीषणं ते समर्पयत्तं कपिनायकाय ॥
समन्त्रिणं तं विनिवेश्य राक्षसं कारालये,, मन्त्रियुतः कपीशः ॥२॥
रामान्तिकंप्राप्य जगादरामं समागतोऽद्यात्र दशाननानुजः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करोम्यहंकिं वदतंविभीषणं प्रभो ? वधार्हः स ममानुमानैः ॥३॥
श्रुत्वावचस्तत्कपिनायकस्य रामोबभाषेऽत्र समानयाऽसुरम् ॥
ततोविचारं प्रकरोमि सम्यग्विमुक्तये वाऽथ वधाय तस्य ॥४॥
रामाज्ञया वानरयूथपास्तं समन्त्रिणं रामसमीपमानयत् ॥
रामं समालोक्य विभीषणस्तदा प्रणम्य रामं समुवाच सत्वरम् ॥५॥
भ्राता प्रभो ? ऽहं दशकन्धरस्य भ्रात्रानिरस्तः समुपागतोऽत्र ॥
वेदैरविज्ञे प्रणतार्तिहारिणि मदीयतां स्वस्यपदेऽतिभक्तिः ॥६॥
वाक्यंसमाकर्ण्य विभीषणस्य कपीश्वरो राममुवाच तत्र ॥
विस्वासपात्रो नहितेप्रभोऽयं यतोऽनुजः संभृणु रावणस्य ॥७॥
ततः समाज्ञापय देव ? वानरान् विभीषणस्यास्य वधाय तूर्णम् ॥
बद्धाञ्जलिं चाश्रुयुतंविभीषणं दृष्ट्वापुरः प्रेमसमन्वितं तम् ॥८॥
विभीषणं सत्यपथेस्थितं तदा रामः कपीशं समुदाजहार ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तः सखे ? मे शरणंयतस्त्वसौ ततोनवध्यः खलु वानरैरयम् ॥९॥
लङ्काधिपत्यं प्रददामि तस्मै भवत्वयं भूमिपतिर्ममेक्षणात् ॥
राज्याभिषेकं प्रचकार तस्य विभीषणस्याशु जलेन सिन्धोः ॥१०॥
दृष्ट्वेति हर्यृक्षगणाः प्रचक्रु जंयेतिशब्दं शुभदायकं भृशम् ॥
कृत्वाऽभिषेकं समुवाच रामो विभीषणं भक्तिनताननं तम् ॥११॥
कुरुष्व लङ्कानगरस्यराज्यं खेस्तो हि यावद्रविशीतरश्मी ॥
ततः कपीशः समुवाच राक्षसं विनाशहेतोरिह रावणस्य ॥१२॥
सहायकस्त्वं रघुनायकस्य प्रसंगरे सम्भव तद्विश्रुत्य ॥
उवाच किञ्चिन्न रघूत्तमस्य भवेद्धितं तस्य मयेत्यबुद्धिना ॥१३॥
भक्त्या च शक्त्या हि तथात्वमायया करोमिदास्यंत्वमहं नसंशयः ॥
ततःपरं रावणप्रेषणाद्द्रुतं कपेः स्वरूपेण समागतः शुकः ॥१४॥
ज्ञात्वा प्रपञ्चं कपयस्तदा तं निगृह्य दुःखानि ददुर्हि तस्मै ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तः स रामेण शुको द्रुतंययौ लङ्कामुवाचाथ निशाचराधिपम् ॥१५॥
प्रभो! द्रुतं राघवतः सुमैत्रीं कुरुष्वनोचेन्नभवेद्धितं ते ॥
यतोनयोर्युद्धुं समरेसमर्था हर्यृक्षयोर्नायकसंघतोऽसुराः ॥१६॥
कुम्भश्रवश्चेन्द्रजितादयोऽन्ये ततः सयादाय विदेहकन्यकाम् ॥
व्रजस्व रामाय समर्पयत्वं हितायराजन्! सकलासुराणाम् ॥१७॥
रामो हरिर्मानवरूपतोऽत्र समागतः सत्यमवेहि मेवचः ॥
वाक्यंसमाण्यं शुकस्य रावणः क्रोधादिदम्प्राह पुरोममाशु ॥१८॥
व्रजस्व नोचेदसिना निहत्य सम्प्रेषयिष्यामि यमस्य सादनम् ॥
श्रुत्वावचस्तस्य निपत्यपादयोः शुकोद्रुतं स्वस्यगृहम्प्रयातः ॥१९॥
रामस्यसन्दर्शनतोहि सद्यो वभूव शापात्स मुनेः प्रमुक्तः ॥

इति श्रीमद्वालबोध रामायणे युद्धकाण्डे त्रितीयः सर्गः ॥३॥

रामः समुद्रं प्रसमीक्ष्य तत्र भयानकं नक्रझषादिभियुतम् ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महास्वनं चोर्मिभिरुन्नताढ्यं सीतामनुस्मृत्य कपीन्द्रमाह ॥
सखे ! समुद्रं शतयोजनायतं कथंससैन्यैः प्रतराम्यहम्वद ॥२॥
कथं हनिष्यामि निशाचराधिपं सीताञ्च द्रक्ष्यामिकथं शुभाननाम् ॥
पश्याम्यहं नैव महार्णवस्य पारं परं गन्तुमितो हि युक्तिम् ॥३॥
सखे ! करिष्यन्ति प्लवंगमाः किं समुद्रमालोक्य बभूवुराकुलाः ॥
श्रुत्वावचस्तद्रघुनायकस्य विलोक्य सिन्धुञ्च हरीश्वरास्ते ॥४॥
सर्वे बभूवुर्व्यथिताहि तत्र तटेनिषीदन्ति महार्णवस्य ॥
एवं गते तत्र दिनत्रयं ततः समुद्रमालोक्य कपीश्वरम्प्रति ॥५॥
रामोऽवदन्मां मनुजंस मत्वा सिन्धुर्न मे सन्निकटे प्रयाति ॥
तथाच ते किं कपिभालुसंघा बुद्धेति सिन्धुः सुखतःस्थितोऽत्र ॥६॥
पश्यन्तु हर्यृक्ष निशाचरेशाः सिन्धोर्जलं वह्निशरेण सर्वम् ॥
संशोषयामीह तदा हरीश्वराः पद्भ्यस्तरिष्यन्ति महार्णवेऽस्मिन् ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीत्वा धनुर्वामकरेण रामः शरञ्च नीत्वा खलु दक्षिणेन ॥
बभूव कोपारुणनेत्रयुग्मः सम्वीक्ष्य तं भूतगणा वितत्रसुः ॥८॥
मीनास्तथा नक्रझषादयोऽन्ये तप्तास्तथा व्याकुलिता बभूवुः ॥
सम्वीक्ष्य सुष्कं खलुयोजनैकं जलं समुद्रः स विदृश्यतांगतः ॥९॥
पुरःसमारोप्य रघूत्तमस्य उपायनं भक्तियुतेन चेतसा ॥
ननाम पादौ शिरसाभयेन वद्धाञ्जलीभूय चकम्पिताङ्गः ॥१०॥
क्षमस्वदोषं मम नाथ ! सर्वं ददामिमार्गं समुवाच सिन्धुः ॥
नलः क्षिपेल्लब्धवरः स्वहस्ताद्वृक्षोपलौ नाथ ! जलेऽत्र सिन्धौ ॥११॥
नमज्जतुस्ता विहतोयमध्ये काष्ठोपलौ सत्यमवेहि राघव ! ॥
तदाऽस्यपारे प्रभवेच्चसोगम मतस्तमाज्ञापय सेतुवन्धने ॥१२॥
शरस्त्वयं सम्प्रति पात्यतामितः सौम्येप्रदेशे द्रुमकुल्य संज्ञके ॥
कीर्तिर्हि ते राम ! भवेत्त्रिलोके उक्त्वेतिवाचं समभूददृश्यः ॥१३॥

इति श्रीमद्बालवोधरामायणे युद्धकाण्डे चतुर्थः सर्गः ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामस्ततो मन्त्रिगणाद्विविच्य प्रारम्भयत् सागरबन्धनेत्वराम् ॥
रामाज्ञया वानर भालुनायका श्चानीय वृक्षोपल पर्वतांश्च ॥१॥
नलाय सर्वे प्रददुः स सागरं बबन्धसम्यक् सुदृढं विशालम् ॥
कृत्वा हरिस्तत्र हरस्य मन्दिरं संस्थाप्य शम्भुं समुवाच रामः ॥२॥
सम्पूजयेद्यो विमलोदकेन नरः स सायुज्यमवाप्नुयान्मे ॥
तेनैवमार्गेण ययुः प्लवंगमा दिशांहि याम्यामतिवेगतस्ततः ॥३॥
रामः समारुह्य मरुत्सुतस्य स्कन्धे तथावालिसुतस्य लक्ष्मणः ॥
रामेणसार्द्धं कपिपस्तथैव ययुस्त्रयस्तेऽतिबलैर्द्रुतादुतम् ॥४॥
दिदृक्षवः कच्छप नक्रमत्स्या स्तथैवसर्वे जलजन्तवोमुदा ॥
विलोक्य रामं सुखिनोहि सर्वे जलौकसाश्चानिमिषावभूवुः ॥५॥
एवं ययुस्ते कपि भालुसंघा स्तेनैवमार्गेण तथाच पृष्ठैः ॥
जलौकसानां प्रययुर्हि केचित् प्राप्ताः परम्पार मुदन्वतस्ते ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सैन्यं समावेस्य तटेऽर्णवस्य सुवेलशृंगोपरि पावनेस्थले ॥
रामस्थिस्तत्र नृपानुजाभ्यां सहैव सैन्यैःपरिरक्षितश्च ॥७॥
ततोहरि मंन्त्रिगणाद्विविच्य कपीश्वरस्यानुमतेन चाङ्गदम् ॥
अप्रेषयद्रावणराजधान्यां ज्ञानोपदेशाय दशाननस्य ॥८॥
कोलाहलः सम्प्रबभूव तत्र विज्ञाय सैन्यैःसह राघवागमम् ॥
कुर्वन्ति ते स्वस्यगृहे विचारं स्मृत्वाबलं वायुसुतस्य सर्वे ॥९॥
आगत्य सर्वान् परिमर्घ सोऽत्र ययौपुनर्यस्य बलस्यनान्तः ॥
सएवगत्वा ऽद्यकपेःसमूहं नीत्वाऽऽगतो ऽस्मिन्नगरे पुनर्बली ॥१०॥
अतो भवेत्किं नगरस्य दुर्दशा निशाचराणामपि तन्नविद्महे ॥
अथाङ्गदो राघवशासनेन प्राप्तः पुरं राक्षसनायकस्य ॥११॥
हितंप्रवक्तुं दशकन्धरस्य सम्वीक्ष्य वीराः प्रवदन्ति तत्र ॥
समागतश्चाद्य कपिप्रवीरः सएव किम्वान्यतमो हरीश्वरः ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंहि सर्वे प्रवदन्ति तत्र निशाचरास्तस्य पुरोधिवासिनः ॥
किमत्र कार्यं न पुनः प्रविशहे तिष्ठन्तु सर्वे स्वगृहेषुसंयमैः ॥१३॥
विविच्य सर्वेऽति भयेन राक्षसा गृहे गृहे तन्नगरे कपाटैः ॥
द्वाराणि संछाद्य वहिर्व्रजेयु र्गृहाद्गृहं चापिन केऽपिराक्षसाः ॥१४॥
अपृच्छिताश्चापि विलोक्य वानरं निशाचरा स्तस्यपुरः समूचुः ॥
अनेनमार्गेण कपे ! व्रजाशु भूपालयं वानरवीर ! सत्त्वरम् ॥१५॥
एवं स सद्यः प्रययौ गृहान्तिकं भूपस्य सम्वीक्ष्य निशाचरास्ततः ॥
ययुर्नृपस्यान्तिक माशुसर्वे भूपं समूचुः खलु वानरागतिम् ॥१६॥
भूपाज्ञया तेऽतिवला निशाचरा नीत्वाकपिं सादरतोहि सर्वे ॥
प्राप्ताः सभायां दशकन्धरस्य तत्रोपविष्टः स कपिर्नृपाग्रे ॥१७॥

इति श्रीमद्बालबोध रामायणे युद्धकाण्डे पञ्चमः सर्गः ॥५॥

उवाच भूपः प्रविलोक्य वानरं कस्त्वं कुतश्चात्र समागतोऽसि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यं किमत्रास्ति वदस्वसत्यं कपे ! भयं माकुरु केनवाऽत्र ॥१॥
सम्प्रेषित स्तस्य वदस्व संज्ञां शीघ्रं सभायां मम वानरोत्तम ! ॥
वाक्यं समाकर्ण्य दशाननस्य विमृश्यसर्वं समुवाच वानरः ॥२॥
स्मृत्वा प्रभावं रघुनायकस्य प्राहेति वाक्यं रघुनाथशासनैः ॥
समागतस्ते हितहेतवेऽद्य सम्बन्धमालोक्य मया त्वयासह ॥३॥
समर्प्यसीतां रघुनन्दनाय कुरुष्वसन्धिं मम भाषणादिह ॥
सम्प्राप्यसीतां रघुनायको मुदा गमिष्यतित्वन्नगरान्न संशयः ॥४॥
राज्यन्त्विदं स्वर्गसमप्रभं चिरं भुङ्क्ष्वाचत्वं त्वं सहबन्धुभिर्मुदा ॥
नचेदिदं राक्षसराज ! सर्वं बलंत्वदीयं प्रविनंक्ष्यति ध्रुवम् ॥५॥
श्रुत्वाङ्गदा त्सत्ययुतं सुभाषितं दशाननः सारुणलोचनः सन् ॥
उवाच सद्योऽतिरुषा प्लवंगमं मृत्युर्हि तेऽत्यन्त समीपमागतः ॥६॥
त्वामद्य हत्वा जनकात्मजां ततो निहत्य रामं सहलक्ष्मणेन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्षोहनिष्यामि कपीश्वरं ततो विभक्षयिष्यन्ति हरीन्निशाचराः ॥७॥
श्रुत्वादशास्या दतिकोपतोऽवदत् कपिद्रुतं प्रस्फुरिताधरोऽसौ ॥
तिष्ठन्तुतावत् खलु तेत्रयोऽपि ममैवपादं शृणु भूमितोऽचिरम् ॥८॥
उद्धृत्य ते वीरगणाश्चसर्वे कुर्वन्तुसत्वस्य महापरीक्षाम् ॥
उक्त्वाऽङ्गदः सन्मनसा रघूत्तमं स्मृत्वा पदंस्वस्य भुविन्यरोपयत् ॥९॥
ततः समाहूय स रावणोऽसुरा नुवाच तान्भूमितएव पादम् ॥
कपेः समुद्धृत्य वसुन्धरायां निःक्षिप्य सर्वेप्रविकर्षताज्ञया ॥१०॥
ततोऽसुरा रावणशासनाद्रुतं ते जग्रहुर्वानरसत्तमस्य ॥
पदं परं नैव चचालभूमितो दृष्ट्वेतिदृश्यं स्वयमजन्नृपः ॥११॥
जग्राह गत्वा पदमङ्गदस्य विमृश्य तारातनयो जगाद ॥
संगृह्य गत्वा रघुनायकस्य पदं न मेपादपरिग्रहा च्छुभम् ॥१२॥
श्रुत्वा स सद्यः दमङ्गदस्य हित्वोपविष्टः प्रवभूवलज्जितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वानतिक्रम्य कपिः स तस्मात् सभा गतो राघवयोः समीपम् ॥१३॥
नत्वाऽङ्गदस्तत्र स रामलक्ष्मणौ कपीश्वरंचापि जगाद वृत्तम् ॥
प्रभो ? दशास्यः किल कालपाशबद्ध स्ततोनैव श्रु तंमयोदितम् ॥१४॥

इति श्रीमद्वालवोध रामायणे युद्धकाण्डे षष्ठः सर्गः ॥५॥

ततः सरामोऽनुजतः कपीशाद्विभीषणा ज्जाम्बवतो मरुत्सुतात् ॥
विविच्य युद्धाय समादिदेश सैन्यानि सर्वाणि स्वयं समर्षम् ॥१॥
हृष्टावभूवुः ल्लवगाग्रगण्या श्चोत्पाट्य वृक्षोपलपर्वताश्च ॥
ययुः प्रचक्रुः खलु सिंहनादं द्वाराणिते संरुरुधुः पुरोऽस्य ॥२॥
श्रुत्वादशास्योऽ तिभयानकंरवं प्लवंगमानां परितोहि सद्यः ॥
आहूय सर्वानतिभीमविक्रमान् प्रहस्तमुख्या न्दिमाहतत्र ॥३॥
सर्वे शृनुध्वं ममपालिताये निशाचरा वानरतः प्रयोद्धुम् ॥
आदाय शस्त्राणि रणाजिरेद्रुतं व्रजन्तु चास्मिन्समये ममाज्ञया ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वा ययुस्तेऽतिबलान्विता स्ततो नीत्वाधनुर्वाणकृपाण तोमरान् ॥
शूलं भुशुन्डीं परिघादिकानि शस्त्राणि सर्वे युयुधुः प्लवंगमैः ॥५॥
बभूवयुद्धं परमं भयानकं निशाचराणा मथवानराणाम् ॥
दन्तैर्नखैः पादपतोऽद्रिवर्यै र्निशाचरादीनहन् हरीश्वराः ॥६॥
तथैववाणै रसिभिश्च तोमरैः शूलैस्तथापट्टिशतः परश्वधैः ॥
हरीश्वरादी नहन्निशाचराः परं तयोस्तत्रन कस्यचिज्जयः ॥७॥
समुच्चरन्तः कपिभालुसंघा रामोजयत्यत्र निशाचरास्तथा ॥
जयंहि लङ्काधिपतेर्ब्रुवन्तः परस्परं ते रणमाश्रयन्ति ॥८॥
ततो हनूमानति वेगतोद्रुतं प्रविश्य मध्येरजनीचराणाम् ॥
दन्तैर्नखै र्मुष्टितलै स्तथोपलै र्जघान सर्वान्रजनीचरान्भृशम् ॥९॥
ऋक्षैस्तथा वानरवीरवर्यै र्निशाचरास्तत्र हताः प्रसंगरे ॥
हतावशेषाः प्रययु र्निवेदितुं नृपान्तिकं शोणितपूरिताङ्गाः ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सायंसमालोक्य हरिप्रवीरा ऋक्षास्तथा रामसमीपमाययुः ॥
दशाननस्तत्र पुनर्विचारं कृत्वाऽतिरोषेण निशाचरान्गणान् ॥११॥
आहूय युद्धाय समादिदेश ययुश्चते घातयितुं प्लवंगमान् ॥
हर्यृक्षपास्तेऽपि पुनर्हि प्रातर्द्वाराणिसम्यग्रुरुधुः पुरोऽस्य ॥१२॥
पुनस्तयोस्तत्र बभूवयुद्धं हरिश्वराणां रजनीचरैः सह ॥
भग्नं स्वपक्षं प्रविलोक्य तत्र जगाम सद्यः खलु मेघनादः ॥१३॥
बाणैरसंख्यैः समरे स वानरान् कृत्वाऽऽर्तियुक्ता न्प्रजगर्जतत्र ॥
ततः स्वपक्षं प्रविलोक्य न्यूनं ययावरं तत्र फणीश्वरोऽपि ॥१४॥
युद्धं तयोस्तत्र बभूव घोरं परस्परं लक्ष्मणमेघनादयोः ॥
विलोक्यवीर्यं समरेऽ सुरात्मजो रामानुजस्यामित विक्रमस्य ॥१५॥
प्राप्तोयः कमलासनेन तपसा घोरेण सत्शायको
नीत्वातत् स्वकरेण रावणसुतो चिक्षेप शेषम्प्रति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वाततु प्रपपात तस्यहृदये तेनाहतोलक्ष्मणो
मूर्च्छाम्प्राप्य महीतलेनिपतितस्तत्रैव रामानुजः ॥१६॥
दृष्ट्वा स भूमौ पतितं निशाचरः शेषावतारस्य ययौसमीपम् ॥
लङ्कां विनेतुं प्रविलोक्यचोद्यतं मुष्ट्यावधीद्वायुसुतो निशाचरम् ॥१७॥
मुष्टिप्रहारै रथरावणात्मजो रक्तं वमन्स्त्वस्यपुरं ययावरम् ॥
नीत्वाततो वायुसुतः फणीश्वरमवाप रामस्य समीपमम्बरात् ॥१८॥
सायंसमालोक्य कपेः समूहः समागतो राघवमन्तिकं शुचा ॥
निशाचराश्चापि ययुः स्वलङ्कां परस्परंते ऽतिमुदम्प्रपेदिरे ॥१९॥

इति श्रीमद्बालबोध रामायणे युद्धकाण्डे सप्तमः सर्गः ॥७॥

सर्वे तत्र विलोक्य कान्तिरहितं रामानुजं वानराः
पश्यन्तः सविषादतो ऽतिवलिनः कुर्युर्हि हाहाऽसकृत् ॥
रामश्चाप्यवलोक्य वाक्यविगतं स्वंभ्रातरं लक्ष्मणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सद्यः सम्प्ररुरोद प्राकृतजनस्येवावनौ तत्क्षणे ॥१॥
सौमित्रिं समवेक्ष्य प्राह सशुचं रामं ततोभीषणो
लङ्कायां वसति प्रभोऽतिनिपुणो वैद्यः सुषेणाभिधः ॥
चेद्वैद्योऽत्र समाव्रजेत्स भगवन् ? शेषस्य दुःखंहरेत्
तस्मात्प्रेषय वानरं हि मरुतःपुत्रं च लङ्काम्प्रति ॥२॥
गत्वा तत्रपुरं स तस्यभवने नीत्वासुषेणन्त्विह
देवागच्छतु तेऽनुजस्य निखिलां पीड़ां प्रहर्तुं प्रभो ? ॥
श्रुत्वातद्वचनं द्रुतं रघुवरः सम्प्रेषयामास तं
तद्गत्वा प्रविलोक्य तं सुखयुतंसुप्तं सुशय्यान्वितम् ॥३॥
नीत्वा ऽत्यन्तजवेन रामनिकटे प्राप्तः स वातात्मजो
वैद्यस्तत्र विलोक्य कान्तिरहितं रामानुजं तत्क्षणे ॥
दृष्ट्वा राघव शासनैश्च सकलां नाड़्यां ततो लक्ष्मणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोवाचेति तवानुजस्य तनुतः प्रातर्व्रजेज्जीवनम् ॥४॥
चेद्वीरस्त्वरितम्ब्रजेद्धि सुनगाद्द्रोणाचला दौषधं
नीत्वाकोऽपि समाव्रजेच्च भगवन्! प्रागेव सूर्योदयात् ॥
निःष्पिड्यात्र रसंहि तस्य विधिवत् सम्पाययेल्लक्ष्मणं
पीड़ामस्य निवारयेद्धि सकलां वाक्यं ध्रुवं मे शृणु ॥५॥
श्रुत्वावैद्यविभाषितं रघुवरः सम्पृष्टवान्नायकान्
सर्वान्कोपि गिरेः समानयवटीं प्रागेव भानूदयात् ॥
तैराकर्ण्य विविच्य चातिकठिनं कार्यं मिथश्चाननं
सर्वैस्तत्प्रविलोक्य साश्रुनयनै र्नाङ्गीकृतं कैरपि ॥६॥
रामो वन्धुमवेक्ष्य रावणसुतात्सपीड़ितं मूर्च्छितं
वाहुभ्यां परिगृह्य साकुलमनाः स्वाङ्के समारोप्य च ॥
नेत्राभ्यां जलमुत्सृजन्हि वहुशुक् सम्प्राह वातात्मजं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रातर्वन्धुयुतः प्रयामि भवनं कालस्य सत्यं कपे ! ॥७॥
वाक्यं तद्रघुनायकस्य सकलं श्रुत्वाऽब्रवीन्मारुतिः
शोकम्माकुरु हेप्रभो ? ऽम्बरपथाद्गत्वेन्दुलोकं द्रुतम् ॥
तत्रेन्दुं परिगृह्यसत्वकरतो निष्पिड्य तस्यामृतं
दास्याम्याशु मुखेऽनुजस्य भवतश्चाज्ञा प्रभो ! दीयताम् ॥८॥
सूर्यम्वा गगने निगृह्य भगवन् ! स्थास्याम्यहं तत्र च
लङ्कायां नभवेद्यतोम्बरमणेः सत्यं शृणुष्वोदयः ॥
तस्मान्मां कथयाशु यामिकरणे कार्यस्य सूर्यान्तिकं
वैद्योऽयं प्रकरोतु दीर्घसमयं दुःखस्य सौम्यौषधम् ॥९॥
श्रुत्वा वायुसुतात् स वीर्यसहितंवाक्यं सुभक्त्यान्वितं
रामश्चाह कपे ! समानय शुभं द्रोणाचलादौषधम् ॥
प्राणस्थास्यति मेऽनुजस्य नियतं सूर्यावधिस्तेन च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रागागच्छ ममान्तिकं समुदयात्सूर्यस्य रक्षायमे ॥११॥
श्रुत्वासुवाक्यं रघुनन्दनस्य सुखेन तस्मात्खलु वायुनन्दनः ॥
सम्प्रस्थितं चौषधहेतवेद्रुतं चारात्समाश्रुत्य निशाचरेश्वरः ॥१२॥
तदैव वेगात्प्रययौ स्वगेहान्मायाविनो वेश्मनि कालनेमेः ॥
दृष्ट्वाऽतिरौद्रं पदतःसमागतं स्वीयाश्रमं सम्भ्रमतस्ततस्तम् ॥१३॥
सम्पूज्य पादौ विधिवत्ससतस्य वद्धाञ्जलिर्वाक्य मुवाच रावणम् ॥
प्रभो ! निशायां वद केनहेतुना ममालये ऽस्मिन्समये समागतः ॥१४॥
श्रुत्वावचस्तत्खलु कालनेमितो विहस्य सर्वं समुवाच रावणः ॥
शृणुष्व वत्साद्य ममात्मजस्य शराभिघातान्निपपात भूमौ ॥१५॥
रामानुजस्तस्य सञ्जीवनाय मरुत्सुतश्चौषधहेतवेऽद्य ॥
यः प्रस्थितो द्रोणगिरौ हि तंकपिं मम्मोहयस्वाशुहितायमे त्वम् ॥१६॥
यथाऽद्य रात्रौ न समाव्रजेत्पुनस्तथा यतस्व ममवाक्यतो ऽसुर ! ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वोदितं तस्य भयेनभूपति मुवाच कार्यं प्रकरोम्यहम्प्रभो ! ॥१७॥
परंभवेन्मेमरणं हि तेन प्लवंगमेनामितविक्रमेण ॥
हतोऽत्रपुत्रस्तव येन तस्य मार्गं हि कारोधयितुं समर्थः ॥१८॥
अतोव्रजत्वाशु गृहंस्वकीयं विसृज्ययुद्धं कुरुतेन सन्धिम् ॥
रामोहरिर्नाशयितुं समर्थो लोकत्रयं सत्यमवेहि तेन ॥१९॥
हिताय संगच्छ गृहंस्वकीयं निशाचराणामपि भाषणान्मे ॥
रामोहि विष्णुर्जनकात्मजारमा तयोश्चिरं सेवय पादपद्मम् ॥२०॥
यतोभवेदत्र सुखं परे प्रभो ! मुक्तिः शुभानैधनजन्मयोर्ध्रुवम् ॥
श्रुत्वावचस्तस्य रुषा समब्रवीदुत्पाट्य खड्गं व्रजदुष्ट शीघ्रम् ॥२१॥
नचेद्धनिष्याम्यसिना ऽधुनैव करोषिनोऽस्मिन्समये मयोदितम् ॥

इति श्रीमद्बालबोध रामायणे युद्धकाण्डे पृष्ठः सर्गः ॥८॥

मृत्युं विमृश्योभयतः स तस्मात् सम्प्रस्थितो वानरविघ्नहेतोः ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्गं समासाद्य हरीश्वरस्य मुनेर्हिमायां कृतवान्क्षणेन ॥
मुनिर्बभूवाश्रम मेकमुग्रं विकल्प्य चादाय करे सुमालाम् ॥२॥
निमीलिताक्षः प्रबभूवमौनी व्याघ्रस्यचर्मोपरि चोपविष्टः ॥
तेनाश्रमं योजनसम्मितं शुभं विनिर्मितं राक्षसमायया च ॥३॥
फलैः सुपुष्पैः खलुनम्रशाखान् द्रुमान्समालोक्य कपिःप्रहर्षितः ॥
तथाऽऽश्रमेतत्र मुनेःस्वरूपात् स्थितोऽसुरो रावणसाशनेन ॥४॥
विघ्नाय तद्वानरसत्तमस्य कृतोद्यमस्तत्र गतः स मारुतिः ॥
मत्वामुनिं तं सलिलं ययाचे ददौ स पानाय कमण्डलुं स्वम् ॥५॥
उवाच नीरं पिबमारुते ! त्वं समुत्थितस्तत्र रघूत्तमानुजः ॥
विलोक्यतं वानरभालुसंघा हृष्टाश्चरामोऽपि विलोक्यहर्षितः ॥६॥
ज्ञातंमया ध्यानधियाऽत्र सर्वं मतः कपे ! मा भृशमुन्मनाभूः ॥
पीत्वाजलं स्वादुफलंच भुक्त्वा विश्रम्यरात्रा विहगच्छ रामम् ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वेतिवाक्यं पवनात्मजस्तदा प्रोवाच मां दर्शय सज्जलाशयम् ॥
जलेन चाल्पेन मनो न तृप्तिं व्रजेन्मुनेत्यन्त पिपासितोऽहम् ॥८॥
ततोमुनिर्बालकमेकं मादृशुतं विकल्प्य प्रोवाच कपिं जलाशयम् ॥
सन्दर्शयस्वाशु मरुत्सुत ! त्वं जलंप्रपीत्वा पुनराव्रजद्रुतम् ॥९॥
कपिस्ततो बालकदर्शितं सरो मनोरमं वीक्ष्य विवेश तस्मिन् ॥
कपेः पदं तत्र निगृह्य वै झषी व्यकर्षयत्स्वस्य निवाससद्मनि ॥१०॥
हताझषी सा मरुदात्मजेन शापाद्विमुक्ता गगनादुवाच ॥
व्रजस्व हेवानरवीर ! शैलं मुनिर्नचासौ किल कालनेमिः ॥११॥
विघ्नाय ते तिष्ठति तत्र सोऽसुरो विहायतं वानर ! गच्छ सत्वरम् ॥
नीत्वावटीं तत्र पुनर्व्रजाशु रामान्तिकं वेगतएव लङ्काम् ॥१२॥
श्रुत्वावायुसुत स्तयोदितमिदंवाक्यं रुषासत्वरं
सामीप्यं समुपेत्य तस्यहृद्‌ये मुष्ट्यान्यहन् तत्क्षणे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यक्त्वाध्यान मुपेत्य सोऽसुरतनुं वायोःसुतस्याग्रत-
स्तस्थौ वानर राक्षसावतिबलौ युद्धोद्यतौरेजतुः ॥१३॥

युद्धं तयोस्तत्र बभूव कालं कियत्ततो वानरसत्तमेन ॥
अवाप्य मृत्युं स जगाम नाकं कपिर्जगामाशु नगोत्तमं तम् ॥१४॥

नालोक्य वैद्यस्य विभाषिताम्बटी मुत्पाटयित्वाऽऽशु ततोऽखिलंनगम् ॥
विविच्यकार्यं कठिनं कपिस्ततः प्रणम्य रामं मनसाऽसकृत्पुनः ॥१५॥

नीत्वाद्रुतं तं शिरसाऽद्रिसत्तमं रामान्तिकं गन्तुमतीव वेगैः ॥
सम्प्रस्थितो व्योमपथात्प्रपश्यन् देशाननेकानतिकौतुकेन ॥१६॥

इति श्रीमद्बालबोधरामायणे युद्धकाण्डे नवमः सर्गः ॥९॥

नन्दीग्रामसमीपवर्ति नभसा गच्छन्तमालोक्यतं
बाणैकेनजधान वक्षसिततो रभानुजो वानरम् ॥
उत्क्वा राम ! रमेति वायुतनयो भूमौपपाताशु च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वातद्वचनं भयेनभरतो गत्वाऽन्तिकं तस्य सः ॥१॥
बाहुभ्यां परिगृह्य केकयिसुत स्तम्वानरं वक्षसि
नीत्वा चाश्रुसमाकुलः सुनयनः सम्पृच्छतीदं शुचा ॥
कस्त्वं केनसमागतोऽत्र गिरिणासार्द्धं निशायाम्वद
श्रुत्वाऽहम्प्रकरोमि तस्यनियतं सम्यग्विचारं तत ॥२॥
श्रुत्वाकेकयिनन्दनाद्धरिवरः सर्वंहि रातस्यतत्
वृत्तान्तं ससुवाच राक्षसगणयुद्धं यथादारुणम् ॥
सौमित्रेःपतनञ्च रावणसुताद्वधस्य सम्भाषणे-
द्रोणाद्रेर्गमनं निशाचरवधं नालोक्यसञ्जीविनीम् ॥३॥
द्रोणाद्रेश्च समूलतोपि नयनं प्रोच्येति प्रोवाचसः
वाणात्ते व्यथितोऽस्मि तेनसमये गन्तुं न चाहंक्षमः ॥
रात्रावेव तनौहि तस्य भगवन् ? प्राणोयतस्थास्यति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात्प्रेषय शैलमुत्तममिमं रामान्तिकं सत्वरम् ॥४॥
श्रुत्वावानरसत्तमात्स भरतः शोकाकुलश्चाब्रवीद्
मद्बाणोपरिसम्प्रतिष्ठ गिरिणासार्द्धं प्रप्रेष्याम्यहम् ॥
रात्रावेवन संशयः शृणुकपे ! श्रुत्वेति दृष्ट्वावलं
यास्याम्याशु तवैव नाथ ! कृपया सार्द्धं गिरे स्तत्पुरे ॥५॥
नत्वा तं भरतं स तत्र पुरतो रामायसम्प्रस्थितः
सार्द्धं तद्गिरिणा ययौ कपिवरो लङ्कान्तिकंचैतदा ॥
अद्रेर्माणिक्यमौक्तिकादि प्रभया देदिप्यमानां दिशां
पूर्वां वीक्ष्य रविभ्रमाद्रघुवरः शंशुच्यमानोऽभवत् ॥६॥
सौमित्रिंप्रविलोक्यं पोणिततनुं रामः प्रभातंतथा
नालोक्यागमनं तथैवमरुतःपुत्रस्य प्राहानुजम् ॥
भ्रातर्मा प्रविलोक्यशोकसहित मृक्षांन्तथावानरान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वान् शोकसमाकुलां हि धुरिमे सम्भाषयोत्तिष्ठच ॥७॥
नोचेत्त्वत्सहितः कृतान्तसदनं यास्याम्यहं निश्चितं
एते ते च कपीश भालुपतयो यास्यन्ति देशान्स्वकान् ॥
सीतामेऽपि वसिष्यतीहभवने पौलस्त्यपुत्रस्य च
हाहा नैव वीभीषणस्य भुवनेस्थानं मयादृश्यते ॥८॥
इत्येवं विलपत्सु तत्रमरुतःपुत्रोहि रामान्तिकं
सम्प्राप्याह स राममौषधविधौ वैद्यं प्रभोऽज्ञापय ॥
श्रुत्वातद्वचनं मुदारघुवरो वैद्यं समाज्ञापयत्
वैद्यो भैषजमानयन्नगवरात्सद्यः सुखेणाभिधः ॥९॥
निष्पीड्योपलतः सभैषजवरं कृत्वा सुपात्रेद्रुतं
सर्वव्याधिविनाशकं भगवतोरामस्य नामोच्चरन् ॥
वैद्यस्तस्य मुखेऽददात्स निखिलं पीयूषतुल्यंरसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पानात्तस्य समुत्थितः स विवदन् श्रीरामरामेतिच ॥१०॥
रामोबन्धुमवेक्ष्य रोगरहित माघ्रायतन्मस्तकं
चाग्रे मारुतनन्दनं सविनयं बद्धाञ्जलिम्वीक्ष्य च ॥
वाक्यंप्राह कपे ? नमेऽस्ति भुवने चास्मिन् सुहृत्त्वत्समं
येनेदं विहितं त्वयैव बलिना धन्यस्त्वदन्योऽस्तिकः ॥११॥
सर्वे तत्रविलोक्य रोगरहितं रामानुजं हर्षिताः
शेषम्प्राप्य वदन्ति भालुकपयो रामान्तिके चासकृत् ॥
लङ्कायां दशकन्धरं सहबलं पुत्रैः प्रपौत्रैर्युतं
हन्मोऽद्यैव न संशयोहि सहसा लोकाः प्रपश्यन्तुतत् ॥१२॥
रामोविविच्याशु ततः कपीश्वरा न्युद्धाय सद्यः कपिभालुसंघाम् ॥
अप्रेषयत्ते प्रययुः सहर्षं निशाचराणां निधनाय संयुगे ॥१३॥
आज्ञां समादाय दशाननस्य सशूल खड्गैर्निसितैः सुशायकैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशाचराश्चापि ययुर्हि तत्र रणाजिरे घातयितुं प्लवंगमान् ॥१४॥
तयोरभूत्तत्र मिथिः प्रयुद्धं प्लवंगमाना मथराक्षसानाम् ॥
भग्नं वलं स्वस्य विवुद्ध्यरावणः सम्प्रेषयामास सहोदरंस्वस् ॥१५॥
स कुम्भकर्णोऽद्दसमोऽम्वराद्ययौ मुदा निहन्तुं कपिभालुसंघान् ॥
विलोक्यरूपं कपयो हि तस्य वितत्रसुस्तत्र जगर्ज राक्षसः ॥१६॥
जगाम रामः स्वलं प्ररक्षितुं कुम्भश्रवस्यापि विनाशहेतोः ॥
पराजितास्तत्र कपीश्वरास्ते कुर्वन्ति हाहेति महारवं रणे ॥१७॥
विदुद्रुवुस्तत्र रणाजिरात्ते पलायमानान्प्रविलोक्य मारुतिः ॥
तथाकपीशश्च नलश्च नीलो वालीसुतो जाम्ववतादयो रुषा ॥१८॥
युद्ध्यन्ति तेनासुरसत्तमेन महावलेनातिभयंकरेण ॥
द्रुमैस्तथा चोपल पर्वतैश्च प्लवंगमास्ते युयुधुः सरोषम् ॥१९॥
गदाभिघातेन निशाचरस्ता नताड़यद्वानरसत्तमानपि ॥

CC-0. In Public Domain. Digitization by eGangotri

विलोक्यरामः समरं तयोस्तन्नीत्वाधनुः शायकयुग्मसन्दधे ॥२०॥
करद्वयं तस्य शरद्वयेन चिच्छेद कुम्भश्रवणस्य सद्यः ॥
व्यादायवक्त्रं स रघूत्तमं तं भोक्तुं ययौ चन्द्रमसं शिखीव ॥२१॥
विलोक्य देवैर्गगनान्तरात्तदा हाहेति शब्दं समुदीरितञ्च ॥
शरद्वया त्तस्य पदद्वयं ततश्चिच्छेद तस्मिन्समये रघूत्तमः ॥२२॥
कृत्वाऽऽर्तनादं स पपात भूमौ रामं ययौ सर्पवदेव दष्टुम् ॥
रामः पुनर्दिव्यशरेण तस्य चिच्छेदसद्यः समराङ्गणे शिरः ॥२३॥
विलोक्यदेवा गगनात्सहर्षं पुष्पाणि रामोपरि संववर्षुः ॥
श्रुत्वादशास्यो निधनं स्वबन्धोश्चिरं रुरोदातिशयेन शोकात् ॥२४॥
विधृत्य धैर्यं रघुनन्दनेन सम्प्रस्थितः सैन्यसहैव योद्धुम् ॥
दृष्ट्वाव्रजन्तं पितरं स्वकीय मास्वास्य संस्थाप्य गृहेन्द्रजित्तदा ॥२५॥

इति श्रीमद्बालबोध रामायणे युद्धकाण्डे दशमः सर्गः ॥५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगाम होमाय निकुम्भिलायां वलैर्वृतः स्वस्यजयाय रामात् ॥
प्रारब्धयत्तत्र स होममेकं निशाचरेशस्यसुतः प्रयत्नात् ॥१॥
निधायसैन्यानि चतुर्दिशासु विघ्नस्यनाशाय हिताय चात्मनः ॥
दृष्ट्वामहान्तं किल होमधूमं विभीषणो राममुवाच सद्यः ॥२॥
प्रभोऽद्यहोमं प्रकरोतिघोरं निकुम्भिलायां शृणु मेघनादः ॥
चेन्नाथ ? होमः प्रभवेत्समाप्तस्तदा न जेतुं समरे समर्थः ॥३॥
निशाचरेशस्य सुतान्न कोपि लोकत्रये सत्यमवेहि तेन ॥
सम्प्रेषयस्वाशु हरीश्वरैश्च सहैव शेषं शृणुनाथ ? सत्वरम् ॥४॥
वधायदुष्टस्य निशाचरस्य नान्यो यतस्तस्य वधे समर्थः ॥
वाक्यंसमाकर्ण्य विभीषणस्य रामोऽनुजम्प्राह शृणुष्व वत्स ? ॥५॥
व्रजाद्यसद्यः पवनात्मजेन नलेन नीलेनतथाऽङ्गदेन ॥
सुमन्त्रिणा जाम्बवताचसार्द्धं विभीषणेनापि समावृतोऽन्यैः ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निकुम्भिलायामति यत्नतस्त्वं हत्वाऽऽव्रजाद्यैव दशाननात्मजम् ॥
श्रुत्वावचस्तद्रघुनायकस्य बभूवसौमित्रि रतीवहर्षितः ॥७॥
प्रणम्य रामं प्रणतार्तिहारिणं नीत्वाधनुः शायकमाशुगञ्च ॥
जगामसैन्यैःसह संख्मयाधिकै र्निकुम्भिलायां हवनस्थले द्रुतम् ॥८॥
तत्रोपविष्टं खलु, मेघनादं जयं स्वकीयञ्च समीहमानम् ॥
निमीलिताक्षं प्रविलोक्य तत्र प्लवंगमाः क्रोधयुताबभूवुः ॥९॥
दन्तैर्नखैः पादतलैश्च मुष्ट्या वृक्षोपलैः शायकपर्वतैश्च ॥
अताड़यन् तत्र निशाचरस्य बलानि सर्वाणि विचुक्रुशुर्भृशम् ॥१०॥
सम्मर्घमानानि बलानिवीक्ष्य समुत्थितस्तत्र दशाननात्मजः ॥
नीत्वाधनुर्वामकरेण सद्यः शरञ्च नीत्वा खलु दक्षिणेन ॥११॥
गत्वापुरस्तत्र स लक्ष्मणस्यावदद्द्रुतं प्रस्फुरिताधरेण ॥
त्वामद्यहत्वा मनुजाधमात्र नयामि सत्यं शमनालयेऽहम् ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्यंसमाकर्ण्य स राक्षसस्याऽवधीद् द्रुतं शायकतोहि लक्ष्मणः ॥
कृत्वा ऽतिनादं धुरितस्य तूर्णं चिक्षेपवाणं सच रावणात्मजः ॥१३॥
तयोर्बभूवाप्रतिमं हि युद्धं शरेण विद्युत्समतेजसा च ॥
परन्तौ खिन्नवलौ मिथश्च जयाऽजयाभ्यां परिवर्जितौ द्वौ ॥१४॥
परिश्रमात्ता वतिनिःश्वसन्तौ शरव्रणाज्जर्जरितौ वभूवतुः ॥
रामानुजस्तत्समये शरैक मादाय हस्तान्निज कार्मुकात्पुनः ॥१५॥
संयोज्य रामस्यपदारविन्दं स्मृत्वा प्रचिक्षेप वधाय तस्य ॥
शरञ्चतद्रावणजस्य सद्य श्छित्वाशिरो भूमितलेन्यपातयत् ॥१६॥
जहर्षइन्द्रोभगवांस्तदाच महर्षिभिस्तत्समये फणीशम् ॥
मुहुस्तुवद्भिर्दिविदेववर्गैं जयेतिशब्दं समुदीरितञ्च ॥१७॥
निशाचरास्तत्र हतावशेषा निरीक्ष्य नाशं घननादकस्य ॥
विदुद्रुवुस्ते ऽतिभयेन तस्मात् विसृज्य शस्त्राणि युयुः स्वलङ्काम् ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋक्षैस्तथा वानरयूथपैर्वृतो रामानुजोरामसमीप मन्वगात् ॥
प्रणम्यरामं शिरसाफणीश्वरो रामस्यपार्श्वे समुपाविवेश ॥१९॥
विबुध्यसर्वं खलुतेनरामः प्रमोदयुक्तः सकपीश्वरोऽभवत् ॥
आघ्रायसद्यः स शिरोऽनुजस्य रामोऽब्रभाषे ऽनुजसन्निधौवचः ॥२०॥
कृतं यदेतत्कठिनं हि कार्यं त्वया नचान्यैः प्रभवेत्कथञ्चन ॥
इन्द्रं विजित्वेन्द्रजयी स लोके ख्यातः कथं सोऽत्र हतस्त्वयाऽद्य ॥२१॥
करोमिघातं सुतशोकसंयुतं श्वएवसत्यं रजनीचराधिपम् ॥
निशम्यवाक्यं रघुनायकस्य हृष्टाबभूवुः कपिभालुसंघाः ॥२२॥

इति श्रीमद्बालबोध रामायणे युद्धकाण्डे एकादशः सर्गः ॥११॥

श्रुत्वादूतमुखाद्धि लक्ष्मणकरान्मृत्युं स्वपुत्रस्य सः
चुक्रोशातिशुचेन सौम्यभवने राज्ञ्यान्वितो रावणः ॥
पश्चान्मन्त्रिवरेण नीतिनिपुणा नाम्नाप्रहस्तेनच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सद्यः सम्प्रविविच्य सैन्यसहितो रामेणयोद्धुं ययौ ॥१॥
रथेसमारुह्य निशाचरैर्वृ तस्तथा हयैश्वोष्ट्रखरैर्गजादिभिः ॥
समावृतश्चित्र विचित्र केतुभिर्नीत्वा सुवाद्यानि रणस्य रावणः ॥२॥
महोदरं देवरिपुं निकुम्भं कुम्भन्तथा मन्त्रिवरंप्रहस्तम् ॥
सुपार्श्वकं सम्प्रघसं हयास्यं नरान्तकं कोटिपतिं करालम् ॥३॥
सर्वान्समाहूय विशालविक्रमान् सेनापतीन् सायुधसैन्ययुक्तान् ॥
ययौ स सर्वैः परिवेष्टितंद्रुतं विलोक्य देवा गगनाद्धितत्रसुः ॥४॥
रामोपि सैन्यैर्बहुभालुवानरैः समावृतो रावणतः प्रयोद्धुम् ॥
कृत्वापुरे वायुसुतंमहाबलं तथाङ्गदं भालुपतिं सुषेणम् ॥५॥
नलञ्च नीलं शरभं मयन्दं दधीमुखं केशरिणंबलिष्ठम् ॥
गजं गवाक्षं द्विविदाख्यकञ्च नखायुधं चण्डपराक्रमं च ॥६॥
पार्श्वेस्थितौ वानरराजलक्ष्मणौ पृष्ठेप्यसंख्यैर्हरिभिर्विभीषणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ययौ स मेघौघ घटान्तरेसद् विद्युल्लतायाः प्रभयैवशोभितः ॥७॥
रामोजयत्वाशु वदन्ति सर्वे,, ऋक्षास्तथा वानरनायकाश्च ॥
प्राप्नोतु युद्धेऽद्य दशाननोज्जयं निशचराश्चापि वदन्ति तत्र ॥८॥
रामेणसार्द्धं प्रवभूवयुद्ध मनूपमं तत्र दशाननस्य ॥
भूमौ हि रामं प्रविलोक्य युद्धे रथेस्थितं राक्षसनायकन्तम् ॥९॥
शक्रः सहर्षाद्विजयाय सद्यो दशाननेनास्य रथं ससारथिम् ॥
अप्रेषयत्तत्र रणे च मातलि नीत्वारथं राघवमाजगाम ॥१०॥
रामः समारुह्य रथेहितस्मिन् शक्रस्यसम्प्रार्थनया स मातलेः ॥
प्रारम्भयद्युद्ध मतीवघोरं समन्त्रिवर्गेण दशाननेन ॥११॥
रामोऽवधी त्तनायकसंघतोऽसुरं दशननोऽसंख्यशरै रघूत्तम ॥
बभूवतुर्नैव जयाजयौ च प्रसंगरे तत्र तयोर्द्वयोरपि ॥१२॥
रामस्यपक्षं प्रविलोक्यचोन्नतं देवावभूवुर्गगनेऽतिहर्षिताः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाच पक्षं प्रविलोक्यन्यूनं रामस्यतेऽ त्यन्तसमाकुलाश्च ॥१३॥
रामं परिश्रान्त मवेक्ष्य मारुति र्दशाननं हर्षयुतंप्रसंगरे ॥
गत्वापुरो राक्षसनायकस्य महाबली वानरवीरसत्तमः ॥१४॥
अहन् स्वमुष्ट्याहृदयेऽसुरस्य मुहूर्तमात्रं स विसंज्ञकोऽभवत् ॥
अवाप्य संज्ञां स मरुत्सुतं कपिं मुष्ट्याऽवधीद्वायुसुतोऽपि किञ्चित् ॥१५॥
सम्प्राप्यदुःखं हि पुनर्निहन्तुं ययौदशास्यञ्च महाकपिर्द्रुतम् ॥
ततोऽतिभीत्या मरुदात्मजस्य दशाननोऽन्यत्रगतः स तस्मात् ॥१६॥
रामो ययौ तत्ररथोपविष्टो वधायदुष्टस्य मशाननस्य ॥
शतैकवारं समरेऽसुरस्य चिच्छेदकन्ठान् कठिनान् समग्रान् ॥१७॥
भवन्ति भूयो दशकन्धरस्य कन्ठाः समग्राः पुनरेवनूतनाः ॥
रामस्तदा चिन्तयते हि तत्र बाणेनयैनैव निशाचराभुवि ॥१८॥
हतामयाचास्य वधे शरः स रणेकथं निःफलताम्प्रयान्ति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सचिन्तितं श्रीरघुनायकं तं विलोक्य तस्मिन्समये स मातलिः ॥१९॥
उवाच हेनाथ ? दशास्यनाभौ सुधाऽस्ति तच्छोषय पावकास्त्रैः ॥
निशम्यरामोवचनं हिमातलेर्नीत्वाऽग्निबाणं करतः स रोषात् ॥२०॥
चिक्षेप नाभौदशकन्धरस्य संशोषणायामृतमण्डलस्य ॥
तदन्तरं शायकमेकमुग्रं नीत्वा स वेदोक्तविधानतोद्भुतम् ॥२१॥
चिक्षेप तद्वक्षसि रावणस्य पपात तेनाभिहतो दशास्यः ॥
दृष्ट्वाऽवनौ सम्पतितं दशाननं व्यसुं ततः सर्वदिशांनिशाचराः ॥२२॥
हतावशेषा भयतोविदुद्रुवु हृष्टाबभूवुः कपिभालुसंघाः ॥

इति श्रीमद्बालबोध रामायणे युद्धकाण्डे द्वादशः सर्गः ॥१२॥

अथान्तरिक्षे व्यनदत्सुदुन्दुभिं पुष्पाणि रामोपरि संववर्षुः ॥१॥
देवास्ततस्तस्य पृथक् पृथक् स्तुतिं कृत्वा ययुर्म्मोदयुतास्त्रिविष्टपम् ॥
रामोऽवदत्शक्र मतीवहर्षै मृधेहता मत्कृतएव वानराः ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संजीवयस्वाशु ममाज्ञयैतान् वृष्ट्याऽमृतस्यामरराज ! सकृपम् ॥
श्रुत्वासुवाक्यं रघुनन्दनस्य शंजीवयित्वा ऽमृतवर्षणैः कपीन् ॥३॥
जगाम नाकं स ततोऽब्जयोनिः प्रणम्यरामं शिरसा मुहुर्मुहुः ॥
रामस्तदाऽऽलोक्य कपीश्वरञ्च मरुत्सुतं भालुपतिं च वालिजम् ॥४॥
विभीषणञ्चा प्यपरानुवाच सहायतोऽहं भवतां रणेजयः ॥
प्राप्तः सुकीर्तिर्भुवनेऽत्रवः सदा शृण्वन्ति लोकाभुविवासिनौ मुदा ॥५॥
संकीर्तयिष्यन्ति कथामिमां जना जयोपयुक्तां सुगतिप्रदायिनीम् ॥
अथान्तरे रावणपालितास्त्रियो मन्दोदरीचान्यतमाः समागताः ॥६॥
शुचारुदन्त्यः खलुरावणस्य मृतस्यचाग्रे सशुचंविभीषणम् ॥
विलोक्यरामोह्यनुजम्बभाषे सम्बोधयस्वाशु विभीषणं त्विह ॥७॥
निवार्य्य सर्वाः खलुरावणप्रियाः करोतुकार्यं मृतकस्यसर्वम् ॥
निशम्य वाक्यं रघुनायकस्य विभीषणस्यान्तिकमेत्य लक्ष्मणः ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानोपदेशैः समबोधयत्तं सचापिसन्त्यज्य शुचं विभीषणः ॥
निशाचरीस्ताः परिबोध्य सम्यक् देहं ददाहाशु दशाननस्य ॥९॥
रामाज्ञया पौरजनैःसमेतं श्राद्धादिकंचापि चकार भक्तितः ॥
ततःपरं भक्तविभीषणंतं राज्येनियोज्यातिमुदा रघूत्तमः ॥१०॥
समानयामास विभीषणस्य मतेन सीतां मरुदात्मजोऽसौ ॥
कृत्वासुकाष्ठस्य महच्चयंतदा प्रज्वाल्यवह्निं खलु तत्रकाष्ठे ॥११॥
उवाचरामो विश पावकेऽस्मिन् लोकापवादस्य निवारणाय ॥
सीतातदा सम्प्रविवेश वह्नौ रामाज्ञया कालमतीत्यकिञ्चित् ॥१२॥
आगत्य रामं प्रणिपत्य पार्श्वे रामस्य सा पूर्ववदेव संस्थिता ॥
समातलि शक्ररथं तदाऽसौ सम्प्रेष्य शक्रस्यपदे रमेशः ॥१३॥
स्वयं समारुह्य रथे सुपुष्पके सीताऽनुजाभ्यां सहितोऽम्बुजाक्षः ॥
रामोऽब्रवो दृक्षगणाञ्च वानरान् व्रजन्तुसर्वे स्वनिकेतनानि ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यास्याम्यहं स्वस्यपितुःपुरं भोः श्रुत्वातमूचुः कपिभालुराक्षसाः ॥
वयन्त्वयोध्यां प्रतिगन्तुमिच्छवो नयस्व सर्वानिह राम ! सेवकान् ॥१५॥
दृष्ट्वाऽभिषेकं तवनाथ ! तेपुरे वयंव्रयामोऽथ पुरःस्वकीयाः ॥
रामोऽब्रवीत्तानिह पुष्पकेच सर्वेसमारुह्य मयैवसार्द्धम् ॥१६॥
व्रजन्तु ते चारुरुहुर्विमाने निशम्यवाक्यं रघुनायकस्य ॥
ततोविमानं रघुनाथशासना द्विहायसा सौम्यदिशाभ्रगच्छत् ॥१७॥

इति श्रीमद्बालबोध रामायणे युद्धकाण्डे त्रयोदशः सर्गः ॥१३॥

शम्पातयित्वा परितोहिदृष्टिं रामोऽब्रवीद् भूमिसुतांप्रपश्य ॥
लङ्कां त्रिकूटाद्रिशिरःस्थिताम्प्रिये ? महाप्रभां स्वर्णविनिर्मितां शुभाम् ॥१॥
तथाऽसुराणां च हरीश्वराणां युद्धं बभूवाद्भुतमत्र पश्य ॥
दशाननोऽप्यत्र मया हतः प्रिये ? तथाऽत्र कुम्भश्रवणादयोऽन्ये ॥२॥
सम्पश्य भूमिञ्च रणस्थरक्तां मांसैरसृग्भिः परिमिश्रितांहि ॥
सम्पश्य सेतोरिह बन्धनं तथा शम्भोःप्रतिष्ठां च मयाकृताऽत्र ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रामं प्रपश्यात्र कपीश्वरस्य पम्याभिधं सौम्यतरं महाप्रभम् ॥
नीत्वाचतद् ग्रामतएव तारां रुमाञ्च सद्यः प्रययावरम्पुनः ॥४॥
रामो विदेहस्यसुतामुवाच प्रिये ? प्रपस्यामलभूमिभागम् ॥
सम्पश्य चाद्रिं खलु रिष्यमूकं वाली वलीह्यत्र मयाहतः प्रिये ? ॥५॥
सुग्रीवतश्चात्र वभूवसख्यं मरुत्सुतात्सौम्य समागमोऽत्र ॥
सम्पश्य दैत्याः खलुपञ्चवद्यां खरादयोऽत्रैव हतामया प्रिये ? ॥६॥
तथाऽऽश्रमान् पश्य मुनीश्वराणां प्रियेऽद्रिसौम्यं खलु चित्रकूटम् ॥
कैकेयिपुत्रः समुपागतोऽत्र मां नेतुकामः सहवन्धुवर्गैः ॥७॥
पुनर्भरद्वाजमुनेः शुभाश्रमं प्रपश्यतीरे शमनानुजायाः ॥
शिष्योपशिष्यैर्वहुभिः समावृतं तरोःसमूहाद्वितत समन्ततः ॥८॥
भागीरथीं लोकमलापहारिणीं सम्पश्य सीतेऽतिशुभप्रवाहाम् ॥
तथात्वयोध्यां ममजन्मभूमिं कुरुप्रणामं परिपश्य भामिनि ? ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंत्वयोध्या मतिवेगतोद्रुतं प्राप्तः स यानो विमलाम्बराच्च ॥
रामाज्ञया तत्र सुभूमिमध्येऽपतद्विमानं सरजूतटान्तिके ॥१०॥
श्रुत्वानरास्तत्र निवासिनः शुभं रामागमं हर्षयुता वभूवुः ॥
स्थिताश्चये यत्र पुरोहि तस्याः समागता राममवेक्षितुं द्रुतम् ॥११॥
तथाच रामागमनं प्रवुद्ध्वा समागतः केकयिनन्दनोऽपि ॥
सवन्धुको रामसमीपमेत्य जग्राह पादौ प्रणिनम्य चेतसा ॥१२॥
रामोपिदोर्भ्यां भरतंसहानुजं निगृह्यहर्षाद्धृदये समादधत् ॥
आलोक्य सर्वे कपिभालुराक्षसा रामस्य कैकेयिसुतस्य भावम् ॥१३॥
परस्परं प्रेमयुता वभूवुर्देवाः सुपुःष्पाणि ववर्षुरम्वरात् ॥
ततःपरं प्रार्थनया रघूत्तमो जग्राह कैकेयि सुतस्य राज्यम् ॥१४॥
दृष्ट्वाऽभिषेकं रघुनायकस्य नराश्च नार्यो मुदितावभूवुः ॥
रामस्ततोऽमूल्य हिरण्यवस्त्रैः स्रग्भिर्विचित्रैर्मणिमौक्तिकादिभिः ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वान् सुसत्कृत्य सखीन्स्वदेशान् सम्प्रेषयामास कपीश्वरादीन् ॥
कृच्छ्रैर्ययुस्ते कपिभल्लुराक्षसा निरीक्ष्य रामं चिरकालतो मुदा ॥१६॥
रामेस्त्वेवं शासयति प्रजानां नाभूदनर्थं खलु लेशमात्रम् ॥
सर्वेनरास्तत्र सुचिन्तकाः सदा रामस्य प्रेम्णाऽतिशयेन भूमौ ॥१७॥
भवन्ति सर्वाणि सुमंगलानि गृहेगृहे तत्समये प्रजानाम् ॥
सर्वाणि कार्याण्यपि सम्बभूवुर्मनोनुरूप्यैव सदाऽमरैः समम् ॥१८॥

श्रीरामो मरुद्दात्मजेनसहितः सीताऽन्वितः सानुजः
पौरैर्मन्त्रिभिरावृतः सुगुरुणा सम्यग् वसिष्ठेनच ॥
श्रुत्वाऽनेक कथां पुराणजनितां प्राचीनकालोद्भवां
पुत्राणामिव पालनंहि कृतवान्मोदैः प्रजानां भृशम् ॥१९॥

इतिश्री मद्बाल बोध रामायणे युद्धकाण्डे चतुर्दशः सर्गः ॥१४॥

॥ इतियुद्धकाण्डं समाप्तम् ॥

२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥*॥ अथोत्तरकाण्डम् ॥*॥

जायाऽनुजाभ्यां सहितोहि यो वनं कृत्यंचकारैत्य परम्पवित्रम् ॥
प्रणम्य रामं तमुदार कीर्ति तदुत्तरां कीर्ति महम्प्रवक्ष्ये ॥१॥
कैलाशशैलाग्र गतेऽतिशोभने मणिप्रभाभूषित रत्नपीठे ॥
स्थितोहि सिद्धामरसेवितः शिवः पृष्टस्तदा कन्यकया नगस्य ॥२॥
हेनाथ ? रामस्यचरित्र मद्भुतं श्रुतम्मया त्वन्मुखतोऽतिनिर्मलम् ॥
पुनस्त्विदानीं कथयस्व रामस्त्यक्त्वाभुवं येन गतः स नाकम् ॥३॥
उवाच शम्भुः शृणु मेप्रिये ? त्वं रामस्य निर्याणयुतां कथांशुभाम् ॥
पुरान या कैरपि सम्प्रपृष्टा तामद्य सम्यक्कथयाम्यहन्ते ॥४॥

कैकेय्या च सुमित्रयासह मुदा माताऽतिवृद्धाऽमला
कौशल्या पदमव्ययं गतवती पत्युःसमीपं तदा ॥
प्रेतायाः कृतवान्स कार्यमखिलं मातुर्विधानेनच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राज्यं भूमितलेऽकरोत्स कतिचिद्वर्षाणि सीताऽन्वितः ॥५॥
कदाचिदेकान्त मुपस्थितं प्रभुं रामंनवीनोत्पल सन्निभेक्षणम् ॥
दूर्वादलश्यामल कोमलाङ्गं विलोक्य सीता समुवाच तत्र ॥६॥
हेदेव ? देवास्त्विह मामुपेत्य वदन्त्विदं याहि दिवं त्वमग्रतः ॥
रामस्ततस्तत्र गमिष्यतिद्रुतं यतोविनात्वां नवसेद्विभुः क्वचित् ॥७॥
निशम्यवाक्यं स विदेहजाया विहस्यरामः समुवाच जानकीम् ॥
जानाम्यहं देवि ? सुरस्यमानसं वदामियुक्तिं शृणु तस्य सौम्याम् ।८॥
लोकापवादं किल कौतुकान्वितं प्रकल्प्य प्रेष्यामि वनं प्रिये ? त्वाम् ॥
तत्रैव पुत्रौ यमलौ भविष्यतः प्रपश्य गर्भस्तव वर्ततेऽधुना ॥६॥
संस्थास्यसि त्वं विपिने सुताभ्यां सहैव मोदात्कतिचिद्दिनानि ॥
पुनः समागत्य वनादयोध्यां गमिष्यसि त्वं शपथाद्रसातलम् ॥१०॥
सम्प्रेष्य सौमित्रि मितोदिवंद्रुत महम्व्रजिष्यामि ततः सुनिश्चितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं सयाभाष्य स जानकीं ततो जगाम सिंहासन मम्बुजाक्षः ॥११॥
सभ्रातृभिः पौरजनैश्च मन्त्रिभिर्वृतोऽथतैर्हास्य कथाप्रसंगैः ॥
पप्रच्छ रामो विजयाह्वयं तदा वदन्तिकिं मां वद पौरवासिनः ॥१२॥
तत्यं वदाद्यात्र भयंनते किमु यतोनवच्याः प्रभवोऽनुगामिभिः ॥
अतस्त्वया साधुविगर्हितस्त्वा श्रुतंयदेतद् वदसत्यवाक्यम् ॥१३॥
श्रुत्वेति रामस्य विभाषितम्वचो विनम्रमूर्धा विजयोऽब्रवीदिदम् ॥
रामेणकार्यं भुवियत्कृतं तद्दैवैरसाध्यं प्रवदन्ति ते प्रजाः ॥१४॥
परं स्वगोष्ठ्यां रजकोऽवदत्क्वचिद्रामः कथं भूमिसुतां स्ववेश्मनि ॥
समानयद्या विजनाद्वनालया दशाननेनाऽतिदुरात्मना हृता ॥१५॥
दूतात्समाकर्ण्य रघूत्तमस्तदा विमृश्यवाक्यं समुवाच लक्ष्मणम् ॥
सीतां समासृत्य यतोऽद्यवत्स ? लोकापवादं परिपूर्णमाप ॥१६॥
अतस्त्वमद्यैव रथेनजानकीं नीत्वा वनंगच्छ ममाज्ञया द्रुतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वावनं तत्र विदेहकन्यका विसृज्यतां सा किलवाल्मिकाश्रमे ॥१७॥
श्रुत्वाऽतिरोद्रं किल राघवोदितं वद्धाञ्जलिःसन्निदमाह लक्ष्मणः ॥
निर्दूषणां भूमिसुतां गृहश्रियं त्यक्तुं भवान्नार्हसि नीचवाक्यतः ॥१८॥
यतस्त्वया तत्र महापरीक्षा कृता पुनः सानविशंकनीया ॥
सम्प्रेषस्वाशु न चिन्तयान्यत् गत्वाद्रुतं तस्यकरोमि हत्याम् ॥१९॥
वाक्यंसमाकर्ण्य स लक्ष्मणस्य विविच्य वाक्यं पुनराह लक्ष्मणम् ॥
नासीत्तदानीं स्वपुरोजनोऽपि एकस्ततः शंकयितुं सुयुक्तम् ॥२०॥
अतः प्रजानां वचनं गृहीत्वा यथार्थ मेवाशु कुरुष्व मे वचः ॥
श्रुत्वासुमित्रासुतरामयोरिद मुवाच कैकेयिसुत स्त्वदम्वचः ॥२१॥
विहायकस्त्वां नृपतिर्भवेद्यः परित्यजेद् गेहरमांहि सीताम् ॥
संस्थाप्य सीतां जननीं स्वगेहे वधाय मांतद्रजकाधमस्य ॥२२॥
नियोजयस्वाशु प्रभो ? प्रसीद नचेद् भवेद्गेह मिहश्मशानम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतश्च कोपं प्रविहाय वाक्यैर्नीचस्य शान्तिम्व्रज भूप ? सद्यः ॥२३॥
अथाह रोषै रिपुसूदनस्तं रामं समाज्ञाप्य तस्यमृत्यवे ॥
उद्बन्धनायाथ शिरोविभेत्तुं जिह्वां पुनर्वाकिल मां कृपालो ? ॥२४॥

इति श्रीमद्वालबोध रामायणे उत्तरकाण्डे प्रथमः सर्गः ॥१॥

श्रुत्वोदितं भ्रातृभिरैकवाक्यं रामोऽब्रवीद्वाक्य मिदम्विविच्य ॥
राज्यस्य संशासनमस्ति गूढं मद्वाक्य मेवप्रतिगृह्यतामिह ॥१॥
रामानुजो राघवसाशनाद्रुतं रथेनगत्वा कपटान्महद्वनम् ॥
सीतान्वितस्तत्र विलोक्य वाल्मिकेः शुभाश्रमं तां समुवाच लक्ष्मणः ॥२॥
मातः ? प्रगच्छाशु मुनेः शुभाश्रमं निवासहेतोरिह वासरं क्रियत् ॥
एवंसमाभाष्य विसृज्यजानकीं सशोकतो रामसमीपमायश्रौ ॥३॥
सीताऽतिदुःखेन रुरोदसुस्वरं श्रुत्वाच सर्वे रुरुदुश्चराचराः ॥
सीतां समाश्वास्य मुनिः स तस्मान्नीत्वाऽथ तामाश्रममाजगाम ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधायचैकां शुभपर्णशालां संस्थापयामासच दिव्यदृष्टिः ॥
तत्राश्रमेसा मुनिनाप्रपालिता स्थिता सदा राममना मनस्विनी ॥५॥
मुनौपितर्भाव मवेत्य सीता स्थिताऽऽश्रमेतत्र सदैवहर्षिता ॥
मुनिः स्वकन्यामिव मन्यमानः स्थितः सदा रामपदैक मानसः ॥६॥
सीता स्वहस्तेन सुपर्णकुट्यां करोति कार्यं मुनिपूजनस्य ॥
अद्भिश्च पुष्पस्य फलस्य सेचनं प्रेमान्विता सा कुरुतेस्वहस्तात् ॥७॥
तदाश्रमस्तद्दिनतो ऽतिशुभ्रो बभूव वासाज्जनकात्मजायाः ॥
वृद्धिंगतास्तत्फलपुष्प वृक्षाः सीताकरस्यैव जलाभिषेकैः ॥८॥
विहायवैरं पशवोऽपि तत्र चरन्ति सीताम्प्रविलोकयन्तः ॥
ह्रदाः सुतोयैः परिपूरिताः सदा विहंग कञ्जा ऽनिपैः सुशोभिताः ॥९॥
स्थानान्यनेकानि सुशोभनानि मृगैर्द्विजैः सदपिभियु तानि ॥
मुनेर्निवासस्य समन्ततोऽम्बा सीता समालोक्य मुदान्विताऽभवत् ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असूत सा तत्र विदेहजाऽऽत्मजौ यमौ सुश्यामौ रघुनायकोपमौ ॥
श्रुत्वामुनि र्जातककर्म बालयोश्चकार प्रेम्णाऽतिशयेन तत्र ॥११॥
कुशोऽथजेष्ठस्य लवोऽनुजस्य चक्रे मुनिर्नाम तयोर्विशिष्टस्य ॥
अथोपनीतौ मुनिना कुशोलवौ साङ्गाश्रुतीश्चात्मकृतं रमायणम् ॥१२॥
मुनेरधीताः सकलाः सुविद्याः सीतासुतौ प्राज्ञवरौ बभूवतुः ॥
महर्षिणा तेन सुयत्नतस्तौ पुत्राधिकौ वन्यफलैश्च पालितौ ॥१३॥
सीतासती सम्प्रविलोक्य सौभग्यं तथैतयो रूपमनूपमञ्च ॥
विसृज्यशोकं किल कोसलस्य धृतिर्धृता यद्यपि सा वनेस्थिता ॥१४॥

इति श्रीमद्बालबोध रामायणे उत्तरकाण्डे द्वितीयः सर्गः ॥२॥

वीहायसीता मरविन्दलोचनो रामोऽपि शश्वत्परिचिन्तितोऽभवत् ॥
हित्वाशुभोगानखिलान्बभूव मुनेःस्वरूपो मुनिसेविताङ्घ्रिः ॥१॥
एवं कियत्कालमतीत्य रामः कृत्वाविधानञ्च मखाश्वमेधे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधायतस्मिन् शुभहेमसीतां दिदृक्षवो यानपदाः समाययुः ॥२॥
निमन्त्रितास्तत्र महीभुजाऽखिला ब्रह्मर्षयः शिष्यगणैः समेताः ॥
तथाच सिद्धामरनागकिन्नरा मनुष्यरूपैः किल कोसलं गताः ॥३॥
नीत्वाकुमारावपि वाल्मिकस्तदा प्राप्तस्त्वयोध्यां शुभयज्ञभूमौ ॥
विचेरतुस्तत्र सुगायमानौ कुशीलवौ वाल्मिकिना सुसिक्षितौ ॥४॥

गन्धर्वोरग किन्नराश्च मनुजा देवामखे येस्थिता-
स्ते सम्वीक्ष्य सुखेन कस्यविमलौ वालाविमौ सुन्दरौ ॥
दृष्टौ नैवच नश्रुतौहि भुवने कुत्रापि रूपस्वरौ
सत्यं वालकयोः समावितिमिथः सर्वेसमूचुर्जनाः ॥५॥

श्रुत्वाच रामोऽश्रुतपूर्वमेतयो र्दृष्ट्वातयोः स्वस्यसमौ सुकायौ ॥
मुनिं प्रपच्छाशु स कस्यवालकाविमौ मनोजाधिकसौम्यदर्शनौ ॥६॥
श्रुत्वावचस्तद्रघुनायकस्य जगादरामं मुनिनायकोद्भुतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्राविमौ राघव ! भूसुतायाः जातौगृहे मे यमलौ तवात्मजौ ॥७॥
प्रपश्यरूपावति सौम्यदर्शनौ गृहाण रामस्वकुशीलवाभिधौ ॥
श्रुत्वामुनेर्वाक्य मनिन्दितस्तदा रामोनिधायाशु सुतौ निजाङ्के ॥८॥
सीतां समाहूय मखाश्वमेधे रामोऽब्रवीद्वाक्य मिदं कठोरम् ॥
सीते ? कुरुष्वात्र जनौघमध्ये लोकापवादापहृताय कार्यम् ॥९॥
पुनस्तदा पूर्ववदालयेस्मिन् वसातिप्रेम्णा ससुखं मयासह ॥
रामात्समाश्रुत्य वचःकठोरं स्वमातरं सा समुवाच सीता ॥१०॥
रामात्परैः प्रेमकृतंनकैश्चित् स्वप्नेपि चेत्सत्यमिदं वचो मे ॥
तदा विदीर्णा भव रामसन्निधा वहं त्वदङ्के प्रतिगन्तुमीहे ॥११॥
निशम्य भू कन्यकया विभाषितं कोपात्तदा साऽतिशयेनकम्पिता ॥
स्खलत्सु पश्यत्सु सभाजनेषु विदीर्णतां तत्र वसुन्धराऽगमत् ॥१२॥
निगृह्य दोर्भ्यां तनयास्प्रविष्टा पाताल लोकं स्वविलेन भूमिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदाऽभवत्तत्र जनौघमध्ये हाहेतिशब्दः किल रोदनञ्च ॥१३॥
रुरोद रामोऽप्यनुजैः समेतः कुशीलवौचापि रुरुदतुर्भृशम् ॥
तदाऽभवत्तत्र मुहूर्तमात्रं प्राणापहं प्राणभृतांहिदुःखम् ॥१४॥
रामस्तदा वाल्मिकिना गुरोश्च प्रबोधितस्तत्समये सबन्धुभिः ॥
विसृज्यशोकं स कुशीलवाभ्या मकारयत्शास्त्रविधानतः क्रियाम् ॥१५॥
श्रीभूसुतायाः समयोचितां हि ततःपरं राज्यमशायच्चिरम् ॥

इति श्रीमद्बालबोध रामायणे उत्तरकाण्डे तृतीयः सर्गः ॥१२॥

कदाचिदेकान्त मुपस्थितःसन् सोऽचिन्तयन्मानसिकं विचारम् ॥१॥
तदैव दैवाद्रघुनाथसन्निधौ कालः स्वयं दूतकरूपतोऽगमत् ॥
सम्पूजितः सोरघुनायकेन पृष्टस्तदोयागमनस्य हेतुः ॥२॥
रामात्समाश्रुत्य स राममब्रवीच्छृणुष्व हेतुं ममचागमस्य ॥
सम्पूर्णमाशुस्तव मर्त्यलोकात् गतंप्रभो ! तेनचलाद्यशीघ्रम् ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूमौ भवान्भानुकुलेच जातस्त्वयैव सर्वं विधिनोदितंकृतम् ॥
शून्यंविनात्वत् त्रिदिवः प्रभोऽतः सम्प्रेषितोऽहं विधिनाऽन्तिके ते ॥४॥
गत्वादिवंपालय राम ? राज्यं स्वर्गस्यसौम्यं सहलोकमात्रा ॥
स्वर्यानहेतोः किल कालतः कृतो दिनानुबन्धो रघुनायकेन ॥५॥
सम्प्रेष्य तं लक्ष्मणमब्रवीद्धरि र्धनुर्धृतस्तिष्ठ निकेतनाद्बहिः ॥
यदद्य कोप्यत्र जनोममान्तिकं समाव्रजेल्लक्ष्मण ? तस्यहत्याम् ॥६॥
करोम्यहं स्वस्यकरेणसत्यं ततोऽतियत्नेन जनान्प्ररोधय ॥
बन्धुं समादिश्य समाविशद्गृहं रामः सुमित्रातनयः सकर्मुकम् ॥७॥
द्वारेऽतिसन्नद्धमनाः स्थितस्तदा दुर्वाससा तत्र गतः सहर्षम् ॥
गत्वा स सौमित्रिमवेक्ष्य तत्र सम्प्राह रामः क्वगतोऽसि दर्शय ॥८॥
वाक्यंसमाकर्ण्य मुनेः स तत्र बद्धाञ्जलिसन् तमुवाच लक्ष्मणः ॥
रामेणकार्यं कथयस्वकिन्ते कर्मान्तरेसोंऽस्ति करोम्यहन्तत् ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वामुनि र्लक्ष्मणभाषितम्वचः कोपादुवाचेति पुरः स तस्य ॥
रामं नचेद्दर्शयसिद्रुतं त्वं शापात्प्रदग्धं प्रकरोमि तेऽन्वयम् ॥१०॥
श्रुत्वामुनेर्वाक्य मतीवघोरं विमृश्य रामान्तिक मव्रजत्स्वयम् ॥
यतोऽद्य सर्वस्यविहिंसनाद्वै वरंममैकस्य विहिंसनञ्च ॥११॥
रामंसमासाद्य स लक्ष्मणोऽब्रवीत्प्रभोऽत्रिपुस्तत्त्वदर्शनाय ॥
स्थितोगृहद्वारवहिः सकोपात्ततोन्तिकं तेऽत्र समागतोऽहम् ॥१२॥
रामस्तदत्र मुनेःसमीपं गत्वाऽब्रवीद्वाक्य मतीवभक्त्या ॥
मुने ? समाज्ञापय किंकरोम्यहं श्रुत्वाऽब्रवीदेहि सुसिद्धमन्नम् ॥१३॥
रामस्तदातत्र सुसिद्धमन्नं समर्प्यतस्मै करपङ्कजेन ॥
ययौगृहं तं परिपूज्य हार्दैर्भुक्त्वामुनिः स्वंसदनं जगाम ॥१४॥
स्मृत्वाप्रतिज्ञां स्वकृतांहि रामः स्नेहान्नवक्तुं प्रशशाक लक्ष्मणम् ॥
ज्ञात्वा मनस्तस्य स लक्ष्मणोऽब्रवीद् निहन्तुमामद्य शुचन्त्यजाशु ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामः सुमन्त्रं स्वगरुं प्रजाश्च प्राहूयदूतैः समुवाच सर्वान् ॥
कालागमं चात्मकृतां प्रतिज्ञां मुनेर्योध्याऽऽगमनादिकञ्च ॥१६॥
रामात्समाश्रुत्य जनाः समूचुर्वाक्यं यथार्थं रघुनायकम्प्रति ॥
राम ? त्वयैकेन भवेत्प्रजायाः सम्पालनं लक्ष्मणमाशु सन्त्यज ॥१७॥
रामस्तदा लक्ष्मणमब्रवीदिदं भ्रातर्यथेच्छं व्रजमेऽन्तिकाद्द्रुतम् ॥
बुधैः समौ त्यागवधौ प्रकीर्तितौ भवेन्नधर्मस्य परीक्षयोयतः ॥१८॥

इतिश्री मद्बाल बोध रामायणे उत्तरकाण्डे चतुर्थः सर्गः ॥४॥

श्रीरामचन्द्रस्य विभाषितम्वचः श्रुत्वासुमित्रातनयो ऽतिदुःखितः ॥
सत्यप्रतिज्ञं रघुनायकन्तं प्रणम्यगत्वा सदनं स्वकीयम् ॥१॥
सर्वैर्मिलित्वा विधिवद्यथाक्रमं ययौततः सत्सरयूतटान्तिकम् ॥
रामंविना नेहभुविक्वचित्सुखं विमृश्य हातुं भुवनं समीहते ॥२॥
ततोऽनिलारोधनतो द्रुतंययौ स्वर्गं सुमित्रातनयः सुरैर्वृतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वाजनैस्तस्य विचेष्टितं तदा,, इयेष रामोऽपि भुवं विहातुम् ॥३॥
विभज्यराज्यं निखिलं स तत्र समर्पयत्स्वस्य कुलोद्भवेभ्यः ॥
कुशायरामः किल कोसलंददौ ददौलवायोत्तरसौम्य भागम् ॥४॥
तथैव पूर्वादिदिशासु राज्यं स्वभ्रातृजेभ्यः प्रविभज्य सन्ददौ ॥
श्रुत्वातदेदं कपि भालुराक्षसाः ससम्भ्रमात्तत्र तदैव संगताः ॥५॥
ऊचुश्च ते प्राञ्जलयो रघूत्तम मास्मान्विसृज्यात्र भवान् व्रजन्वितः ॥
रघूत्तमस्तत्र विलोक्यमारुतिं बद्धाञ्जलिं सम्यगुवाच रामः ॥६॥
किमद्यतेऽन्तःकरणेऽस्ति मारुते ? ददामिदेवैरपि यत्सुदुर्लभम् ॥
वाक्यंसमाकर्ण्य रघूत्तमस्य प्रोवाच वायोस्तनयो हनूमान् ॥७॥
हेराम ? रामेति जपन्नं मेमनस्तृप्तिंजगामात्र महीतले तव ॥
करोतु नामामृतपानमेव मनोमदोयं शुभदं सदाऽत्र ॥८॥
श्रुत्वेतिवाक्यं स मरुत्सुतस्य भक्तार्तिहारी समुवाचतत्र ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेमारुते ? मर्त्यपदेप्रतिष्ठ ममाज्ञयात्वं किलकल्पमेकम् ।।९।।
रामेति मन्नामजपन्सदैव ततश्च सायुज्य मवाप्स्यसिध्रुवम् ।।
लोके भवेद्यत्र तवप्रपूजनं तत्रैव सर्वाणि सुमंगलानि ।।१०।।
नतत्र विघ्नानि समात्रजेयुः सवाग्रया तत्रवसेद्ध्रुवञ्च ।।
ऋक्षेश ? भूमाविह सम्प्रतिष्ठ यदाभवेद्युद्ध मतीव भीषणम् ।।११।।
कृष्णावतारेऽत्र मयैवसार्द्धं तदैवमुक्तिं त्वमवाप्स्यसि ध्रुवम् ।।
विभीषणम्प्राह रघूत्तमस्ततो धराञ्च यावद्ध्रियते फणीन्द्रहः ।।१२।।
तावत्प्रजाम्पालय मेऽनुशासना द्यतोन वाक्यं मम सम्भवेन्मृषा ।।
रघूत्तमं प्रार्थयते कपीशो राज्याभिषेकं खलु वालिपुत्रे ।।१३।।
कृत्वाऽऽगतोऽहं कृतनिश्चयः प्रभो ? तवानुयानाय निगृह्यतामिह ।।
श्रुत्वेतिवाक्यं कपिनायकस्य जगाद रामः प्रविहस्यतत्र ।।१४।।
सखे ? त्वमद्यत्रज शीघ्रमस्मान्मयैवसार्द्धं मम सत्यलोकम् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रजास्तस्था द्यु र्गमनोत्सुकाया व्रजन्तुताः सत्यपदम्मदीयम् ॥१५॥
एवं स सर्वैर्गमनोत्सुकैर्वृतो जगाम सद्यः सरजूतटान्तिके ॥
उन्मज्य ते स्वर्गमवापुरञ्जसा स्वयम्वभूवाखिललोकनायकः ॥१६॥
स शंख चक्राब्जगदाऽन्वितो ऽभवच्चतुर्भुजश्चारु मनोहराकृतिः ॥
सहैव सद्योऽमरनागकिन्नरै र्विद्याधराद्यैः प्र णतै रराज ॥१७॥
ततोऽमितादित्य क्विकाश संयुतो विहङ्गराजोपरि संस्थितः स्मयन् ॥
ब्रह्मादिदेवैः परिसेव्यमानः स्वयं ययौ सत्यपुरं स्वकीयम् ॥१८॥
रामस्यनिर्याणयुतां कथामिमां पापापहां धर्म्मविवर्द्धिनीञ्च ॥
भक्त्यापठेद्यः स महाप्रयाणे स्मृत्वाहरिं यास्यति तत्पदंध्रुवम् ॥१९॥
पठेदिदंयः प्रणिपत्यरामं रामायणं मत्कृतबालबोधम् ॥
शृणोतिवा ध्यानपुरःसरेण निधायरामं हृदयेमनुष्यः ॥२०॥
भुक्त्वासुभोगानखिलान्सुभूमे व्रंजेत्स सत्यं पदमव्ययं तत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतः शृणुध्वं मनुजा ! भवाय भवेत्र विष्णोःपदमाप्तये परे ॥२१॥
इदंबालबोधं सुरामायणन्ते ददेरामपादारविन्दद्वयेऽहम् ॥
अशुद्धञ्च शुद्धं समस्तं गृहीत्वा दयालो ! दयादृष्टितोमाम्प्रपश्य ॥२२॥
त्रिखाभ्रयुग्मेति २००३ सुशोभनेऽब्दे श्रीविक्रमादित्यनृपस्य सम्वत् ।
तथाष्टषट् सिन्धुरभूमिते १८६८ शके कृतम्मयेदं सुकृतात्मनाम्मुदे ॥
॥❀॥ इत्युत्तर काण्डं समाप्तम् ॥❀॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालक्षितिपाल पालित भुविख्याताऽस्ति या सप्तरी
ग्रामस्तत्र चकास्ति चन्द्रनहराद्यः शक्रपूराऽभिधः ॥
तस्मिन् सौम्यपुरे सुसूर्गणकुले गोपालसंज्ञोऽभव-
त्तत्पुत्रः कृतवानिदं द्विजवरोदामोदरो मैथिलः ॥२३॥
श्रीरानो जगतीतलेऽस्ति जननी संपालितोऽहं यथा
भार्या च प्रियवादिनीह वुधनीनाम्नी त्रिभिर्वालकैः ॥
पौत्रैश्चाप्यनुमोदिता स्वभवने सौम्ये सुखेनस्थिता
गार्हस्थे वसता तयासह मया रामायणं निर्मितम् ॥

सौराष्ट्रे यत्र शम्भुर्विलसति नियतं सोमनाथः सदैव
वर्षे वर्षेच यत्रप्रभवति सुखदा सत्सभा मैथिलानाम् ॥
पञ्जीकारः प्रवीणः प्रवसतिविमले तत्पुरे बोधकृष्णः
संशोध्येदं पुराणं ममकृतमखिलं सोऽभवच्छोधकोऽत्र ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

DATE DUE

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४६४६

AUTHOR शर्मा दामोदर

TITLE बालबोध रामायणम्.

४६४६

015,1A1'g"
SHA

महेन्द्र संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ
पुस्तकालय

CC-0. In Public Domain. Digitization by eGangotri

मुद्रकः—
श्री हरीनारायण दास
पंचायत प्रेस, लहेरियासराय (दरभङ्गा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu